म ॥ पञ्चाङ्गानि ततः कुर्याद् अङ्गमन्त्रेण देशिकः ॥ पञ्चाङ्गानि मनो यत्र यत्र नेत्रं विवर्जयेत् ॥ आचक्राय तथा स्वाहा हृदया-
य नमो वदेत् ॥ अङ्गुष्ठरहिते नैव कराग्रेन हृदं स्पृशेत् ॥ विचक्राय तथा स्वाहा शिरसे स्वाहेति संवदेत् ॥ शिरसि विन्यसेत्त-
द्वत् तथैव करयाखया ॥ सुचक्राय तथा स्वाहा शिखायै वषडुच्चरेत् ॥ तथाधोऽङ्गुष्ठमुष्ट्या तु शिखायां शिरसि विन्यसेत् ॥ त्रै-
लोक्यरक्षचक्राय स्वाहेति कवचाय हुं ॥ हस्ताभ्यां शिर आलभ्य यादान्तं संस्पृशेत् यति ॥ असुरान्तकचक्राय स्वाहास्त्राय फ-
डुच्चरेत् ॥ ऊर्द्ध्वार्द्ध भालत्रितयच्छोटिकाभिर्दिशो दश ॥ वन्धयेन्मुनिशार्दूल नित्या नासाऽयमीरितः ॥ इक्ष्यमाणो हृदात्मानं हृद-
यस्थान्विदात्मकः ॥ क्रियते तत्परात्मा च हृन्मन्त्रेण च देशिकः ॥ सर्वज्ञानिगुणो त्वङ्के सचिद्रूपे परात्मनि ॥ क्रियते विषयाहारः

शिरोमंत्रेणाधीमता॥ हृद्धिरोरूपचित्रामममयताभावचेतना॥ क्रियतेनिजदेवस्यशिरोमंत्रेणसादरम्॥ मंत्रात्मकस्यदेव
स्यमंत्रवाचोनतेजसा॥ सर्वतोवर्षमंत्रेणाक्रियतः ततसंभूतिः॥ यद्दसातियरज्ञानंतविरूपेपरात्मनि॥ हृदयादिमयःतेज
स्यादेतत्नेत्रसंज्ञकम्॥ अध्यात्मवादिरूपंयत्साधकस्यविनाशयेत्॥ अविद्यास्मात्तुमंत्रतत्परंधामसमीरितम्॥ गौतम
उवाच॥ ब्रह्मन्ब्रह्मविदांश्रेष्ठसर्वभूतहितेरतः॥ त्वमेवकृत्स्नदेवस्यअन्तर्यामीनिरामयः॥ अविद्यादोषनिर्मुक्तंसुमस्त्रवृत
संयतः॥ सर्वलोकैकगमनःसर्वलोकैकतत्वावित्॥ सर्वेतुभवमासीत्वंसर्वदेवनमस्कृतः॥ इदानींश्रोतुमिच्छामिमंत्रराजं
परात्परं॥ अस्यदृशार्णमन्त्रस्तुगुह्याद्गुह्यतरःस्मृता तंमंत्रंश्रोतुमिच्छामियदियोग्योस्मिसत्तम॥ भवार्णवनिमग्नंमां
त्वमुद्धर्तुमिहार्हसि॥ इत्याभिस्तुतिभिःसुस्था[illegible]पुनः॥ प्राश्वमासाद्यतद्वक्त्रमतिरासीन्मुनीश्वरः॥ नारदउवा
च॥ साधुपृष्टन्त्वयाब्रह्मन्मयाभिवल्लभाःस्मृतः॥ मन्त्रराजोमुनिश्रेष्ठसर्ववेदागमानुगः॥ ततःप्रभृतिविप्रर्षेहरितामा
न्नावाहनं॥ नवस्वैहात्प्रवक्ष्यामियतत्वंप्रकृष्टप्रिये॥ क्लींकारंपूर्वमुच्चार्यकृष्णंनूर्येपदान्वितम्॥ गोविन्दश्चतथोच्चात्तु

१८१

दशाक्षरं तथोच्चरेत् ॥ भक्त्या ते प्रणिपत्यास्य च कथितो मन्त्रनायकः ॥ गुह्याद्गुह्यतरो ह्येव वांछाचिन्तामणिः स्मृतः ॥ शौनकाद्या
श्च मुनयस्तथान्ये देवसुरर्षकाः ॥ मन्त्रराजपरिज्ञानात्सर्वसम्पत्तांगताः ॥ कृष्णशब्दश्च सत्तार्थो णश्चानन्दस्वरूपकः ॥ सुख
रूपो भवेदात्मा भावानन्दमयस्ततः ॥ गोशब्देन ज्ञानमुक्तिं तेन विन्देत तत्प्रभुः ॥ गोशब्दात्पदद्वन्द्वमुक्तस्ते नरा लभते विभुं ॥ एवं
ते कथितो मंत्रो वामना मुनिसत्तमाः ॥ एतज्ज्ञानानुभावेन जीवन्मुक्तो न चान्यथा ॥ किमन्येन बहूक्तेन स्मरणाच्चास्य मंत्र
वित् ॥ जीवन्मुक्तो न सन्देहो विष्णुरेव न संशयः ॥ नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द उच्यते ॥ कृष्णः प्रकृतिरेतस्य दुर्गो
धिष्ठातृदेवता ॥ वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ नारायण इति ख्यातः पदपञ्चात्मकः परः ॥ अक्षरार्थस्तु क
थितः पदनाम इतीरितः ॥ तस्माद्विज्ञाय वै मंत्री पुरुषार्थचतुष्टयं ॥ लभते मात्र सन्देहः सत्यं सत्यं हि गौतम ॥ बीजशक्ति
पुरा प्रोक्तो विनियोगश्च पूर्ववत् मंत्र ॥ यच्चाङ्गानि मनोरस्य पदपञ्चकयोजनात् ॥ ब्रह्मरन्ध्रे भ्रुवोर्मध्ये जिह्वाग्रे च तथा पुनः ॥
कण्ठदेशे हृदि तथा नाभौ लिङ्गे च मूलके ॥ घ्राणद्वय चक्षुषोश्च कर्णयोर्विन्यसेदिति ॥ ब्रह्मरन्ध्रे पुनः सर्वव्यापकत्रयमाच

गौतमी
५

रेत्॥मूर्द्धि वक्त्रे हृदि नाभौ मूले च पदपञ्चकम्॥प्रोह्य वरोहतो न्यस्य केशवाद्या नखो न्यसेत्॥वर्णन्यासं पुनः कृत्वा केशा-
वाद्यांस्ततो न्यसेत्॥भूतशुद्धिं लिखिन्न्यासं विना यस्तु प्रपूजयेत्॥विपरीतफलं दद्यादभक्त्या पूजनं यथा॥मातृकाद्विवि-
धा प्रोक्ता परा चाप्यपरा तथा॥सुषुम्नान्तःपरा न्यास्या अपरा वाह्यदेशके॥अथान्तर्मातृकान्यासो मूलाधारे चतुर्द्दले॥स्व-
र्णाभे वशषसं चतुर्वर्णविभूषिते॥षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि॥बभमयरलैर्युक्ते विन्दुभासितमस्त-
के॥अनाहते द्वादशारे प्रवालरुचिसन्निभे॥कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥विशुद्धे षोडशदले धूम्राभे-
स्वरभूषिते॥आ[illegible]तु चन्द्राभे द्विदले हक्षभूषिते॥सहस्रारे मणिनिभे सर्ववर्णविभूषिते॥अकथादित्रिरेखात्म-
हलक्षत्रयभूषिते॥तन्मध्ये परविन्दुश्च सृष्टिस्थितिलयात्मकं॥एवं समाहितमना ध्यायन्न्यासोऽयमान्तरः॥मूलादिब्र- तंत्र
ह्मरन्ध्रान्तं विद्युत्पुञ्ज्यायेच्चिदात्मकं॥विन्दुस्रुतसुधासारैः प्लावयेत्मातृकां न्यसेत्॥एकैकं वर्णमुच्चार्य मूलाधाराद् भ्रुवान्त- ५
कं॥न मोऽनन्तामिति न्यास आन्तरः परिकीर्तितं॥वाह्ये वै मातृकान्यासं शृणुष्वावहितो मम॥ललाटमुखवृत्ताक्षिश्रुतिघ्रा-

रोष्ठगण्डयोः ॥ वर्त्सदन्तोत्तमाङ्गास्ये देः स्कन्धाग्रके भुजे च ॥ पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽशके ॥ वाक्पद्यंशे च हृत्पूर्वं पाणिपाद
युगे तथा ॥ अष्टराननयोर्न्यसेन्मातृकार्णान्यथाक्रमात् ॥ चतुर्द्धा मातृका प्रोक्ता केवला बिन्दुसंयुता ॥ सविसर्गा सोभया च रहस्यं शृ
णु कथ्यते ॥ विद्याकरी केवला च सा तया भक्तिदायिका ॥ सविसर्गा पुत्रप्रदा सविन्दुर्वित्तदायिनी ॥ केशवादि ततो न्यासं कुर्यात्साध
कसत्तमः ॥ ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ॥ अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्गकं ॥ करशुद्धिविधानञ्च विधाय
ध्यानमाचरेत् ॥ उद्यादादित्यशङ्काशं तप्तजाम्बुनदप्रभं ॥ कमला वसुधाशाभिः पार्श्वद्वन्द्वं परात्परं ॥ विचित्ररत्नाविहितनानाल
ङ्कारभूषितं ॥ पीतवस्त्रपरिधानं शङ्खकौमोदकीकरं ॥ वामतश्च स्वरूपं मे च ध्यात्वैवं विन्यसेत्ततः ॥ प्रणवं पूर्वमुच्चार्य श्रीबीजं त
दनन्तरं ॥ मातृकार्णं ततो न्यसेद्वक्ष्यामि न्यासप्रकारकं ॥ केशवं विन्यसेत्कीर्त्या कान्त्या नारायणं न्यसेत् ॥ माधवं तुष्टिसहितं गोविंदं
पुष्टिसंयुतं ॥ धृत्या विष्णुं शान्तियुतं मधुसूदनमेव च ॥ त्रिविक्रमं च क्रियया वामनं दयया न्यसेत् ॥ श्रीधरं मेधया हृषीकेशं ह
र्षयुतं न्यसेत् ॥ श्रद्धया पद्मनाभञ्च लज्जा दामोदरं ततः ॥ वासुदेवं ततो न्यस्य लक्ष्म्या शंकर्षणं ततः ॥ सरस्वत्या ततः प्रीत्या प्रद्युम्न

गौतमी ६

चानिरुद्धकं ॥ मत्स्या वज्रिजयेद्दुर्गा गदिनो शार्ङ्गिणा प्रभा ॥ खड्गिसत्ये शङ्खिचण्डे वारुणा च हलिनं न्यसेत् ॥ विलासिन्या मूषलिनं शू
लिनं विजयायुतं ॥ पाशिनं विरजायुक्तं विश्वयांकुशिनं न्यसेत् ॥ मुकुन्दश्च विनद्या सुनन्दानन्दजौ न्यसेत् ॥ स्मृत्या च नन्दिनं सत्या
नरं नरकजित्तथा ॥ हरिः शुद्ध्या कृष्णं भक्त्या बुद्धिसत्यो च सात्वतः ॥ सत्याशौरी क्षमे शूर रमे चोमा जनार्दनो ॥ क्लेदिन्या भूधरं विश्वमूर्त्ति
क्लिन्या ततो न्यसेत् ॥ वैकुण्ठं वसुधे चैव वसुधा पुरुषोत्तमौ ॥ बली च परया युक्तो बलानुज परायणो ॥ बालश्च सूक्ष्मया युक्तो वृषघ्न
ः सन्ध्यायायुतः ॥ वृषभश्च प्रज्ञयायुक्तो हंसश्चैव प्रभायुतः ॥ वराहो निशयायुक्तो विमलो हमोघयायुतः ॥ विद्युता नरसिंहेन कागिता
ः शिवशक्तयः ॥ एवमङ्गं भुविन्यस्य ध्यात्वा पूर्वे समाहितः ॥ भक्त्या तु पूजयेद्देवमोंश्रीं संपलमाप्नुयात् ॥ केशवादिरयं न्यासो न्या
समात्रेण देहिनां ॥ अच्युतत्वं ददात्येव सत्यं सत्यं न संशयः ॥ केशवाद्या इमे श्यामाः सर्वे नारायणाः स्मृताः ॥ शंखचक्रगदापद्म
सज्जचतुष्टयाः ॥ ह्राचेगोपीशगोपी च शयचक्रं शयार्क ह्व ॥ हरुं चवक्षं शयपञ्च दक्षिणोर्द्धं करं क्रमात् ॥ नमोन्तान् सर्वान् समुच्चार्य उ
नारायणाम्मनुं वसेत् ॥ प्राणानात्मानं तथोच्चार्य केशवाय प्रतिक्षरे तत् ॥ क्लीं नमो नमः आयु कृतः इत्यादि न्यासमाचरेत् ॥ मुमुक्षरस्त्वयतय

तंत्र ६

स्वरेयुक्तो समुन्नतं ॥ स्वं मावित्मेर्ध्वसंलक्ष्मीवीजपुरःसरं ॥ स्मृतिर्धृतिर्मेधा लक्ष्मीः प्राप्यानेहरितां व्रजेत् ॥ वाग्भवाद्यं न्य
सन्यासं वशीज्ञात्वमवाप्नुयात् ॥ यडयदायन्न्यसेन्न्यासं तद्वीजे रङ्ग कल्पनं ॥ तत्र न्यासं ततः कुर्यात्साधकः सिद्धिहेतवे ॥ कृतेन ये
वश्री देवरूपतामेव वाप्नुयात्सो ॥ मातृकाना न्यासाणांस्व वीजेन्येकैकशोत्तरेत् ॥ नमः परायेतु चार्य ततस्तत्वात्मने नमः ॥ जीवं प्रा
णाद्वयश्चोक्तास्सवीजं पुत्रवविन्यसेत् ॥ ततो हृदयमध्ये च तत्वात्रयश्च विन्यसेत् ॥ वं वीजं मतितत्वञ्च परमहङ्कारमेव च ॥ यं वीजं
मनस्तत्वाविन्येवं त्रितयं न्यसेत् ॥ नवीजं शब्दतत्वञ्च न्यसेन्मौलीं ततः परं ॥ वं वीजं स्पर्शतत्वञ्च विन्यसेद्दानेन सुधीः ॥ सं वीजं रूपत
त्वञ्च हृदये विन्यसेत्ततः ॥ सं वीजं रसतत्वञ्च विन्यसेद्देवगुह्यके ॥ तं वीजं गन्धतत्वञ्च पादयोरथ विन्यसेत् ॥ णां वीजं श्रोत्रतत्वञ्च श्रो
त्रयोरेव विन्यसेत् ॥ चं वीजं त्वकतत्वञ्च विन्यसेत्त्वाचि साधकः ॥ डं वीजं नेत्रतत्वञ्च नेत्रयोरेव विन्यसेत् ॥ ठ वीजं रसनातत्वं रस
नायामथो न्यसेत् ॥ ट वीजं घ्राणतत्वञ्च नासिकायां प्रविन्यसेत् ॥ ञं वीजं वाक्तत्वञ्च विन्यसेद्वाचि साधकः ॥ झं वीजं पाणितत्वं
च पाणिपोरेव प्रविन्यसेत् ॥ जं वीजं पादतत्वञ्च पादयोरेव विन्यसेत् ॥ छं वीजं पायुतत्वञ्च पायौ न्यसेत्समाहितः ॥ चं वीजं लिङ्गतत्व

त्त्वं विन्यसेद्यथाशिष्यके ॥ उं बीजं तत्वमाकाशं पुनर्मौलौ प्रविन्यसेत् ॥ यं बीजं वायुतत्वञ्च वदने विन्यसेत्पुनः ॥ गं बीजं तेजस्तत्व
त्त्वं विन्यसेत् हृदये सुधीः ॥ रं बीजं जलतत्वञ्च पुनः शिश्ने प्रविन्यसेत् ॥ कं बीजं पृथिवीतत्वं विन्यसेत्पादयोः पुनः ॥ ज्ञं बीजं हृत्पुण्ड
रीकतत्वं हृदि प्रविन्यसेत् ॥ हं बीजं सूर्यमण्डलतत्वं हृदि प्रविन्यसेत् ॥ सं बीजं चन्द्रमण्डलतत्वं तत्र प्रविन्यसेत् ॥ वं बीजं वह्नि
मण्डलतत्वं तत्रैव विन्यसेत् ॥ यं परमेष्ठीतत्वञ्च वासुदेवञ्च मूर्द्धनि ॥ वं बीजं मथ पुंस्तत्वं संकर्षणं मखो मुखे ॥ लं बीजं विश्वत
त्वञ्च प्रद्युम्नं हृदि विन्यसेत् ॥ वं बीजं निवृत्तितत्वं च अनिरुद्धमुपस्थके ॥ लं बीजं सर्वतत्वञ्च पादे नारायणं न्यसेत् ॥ क्षौं बीजं को
लपतं च नृसिंहं सर्वगात्रके ॥ एवं तत्वानि विन्यस्य प्राणायामं समाचरेत् ॥ दशाक्षरेण चेत्तत्र अष्टाविंशति रेचयेत् ॥ पूरये
द्धाम यावत् कुम्भयेत्तत्र मानतः ॥ प्राणायामो भवेदेको रेचकपूरककुम्भके ॥ अष्टादशार्णो चेत्तद्याशेवं समाचरेत् ॥ एकेन रे
चयेत्वाम बीजेनैव पृथक् पृथक् ॥ पूरयेत्तन्नजप्तेन बहिंशत्यान्तेन धारयेत् ॥ सर्वेषु कल्पमन्त्रेषु बीजेनानेन चाचरेत् ॥ अथवास
र्वमन्त्रेषु प्रणवाद्य मनोजयत् ॥ प्राणायामस्त्वरेचं वीरे रेचकपूरककुम्भके ॥ मन्त्रप्राणायामः प्रोक्तो योगिकं कथयामि ते ॥ रचयेद्दक्ष

याविद्यान्मात्रा षोडशकेन च ॥ द्विंशन्मात्रया प्रय्यच्चतुःषष्ठ्यातु धारयेत् ॥ एकश्वासस्त्वेकमात्रा मात्रायां नियमो मतः ॥ मास
जानुनि हस्तस्पर्श मरणं यावता भवेत् ॥ कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥ प्राणायामो द्विधा प्रोक्तः सगर्भश्च निगर्भकः ॥ सगर्
र्भो मंत्रजापेन मात्रया संख्यया भवेत् ॥ प्राणायामात्परं तत्वं प्राणायामात्परं तपः ॥ प्राणायामात्परं ज्ञानं प्राणायामात्परं पदम् ॥ प्रा
णायामात्परं योगं प्राणायामात्परं धनं ॥ नास्ति नास्ति भुवने नास्ति कथितं तव सुव्रत ॥ वासरभ्यासयोगेन कुलसाक्षाद्भवेद्ध्रुवं ॥ चैत
न्यावरणं यदयं क्षीयते नात्र संशयः ॥ प्राणायामं विना मुक्ति मार्गो नास्ति मयोदितं ॥ प्राणायामं विना यत्र साधनं तं न फलं भवेत्
॥ प्राणायामेन मुनयः सिद्धिमापूर्णा चान्यथा ॥ प्राणायामपरो योगी न योगी शिव एव सः ॥ गमनागमनं वायोः प्राणस्य धारणं त
था ॥ प्राणायाम इति प्रोक्तो योगशास्त्रविशारदैः ॥ प्राणो वायुरिति ख्यात आयामस्तं निरोधनं ॥ प्राणायाम इति प्रोक्तो योगीनां योग
साधनं ॥ आयन्तयोर्विधीयन्ते नासिकापुटचारिणः ॥ रेचयेद्दक्षया नासापुरं ये वामतस्ततः ॥ द्वात्रिंशदभ्यसनमंत्रं प्राणायामः
स उच्यते ॥ ब्रह्महत्या सुरापानं गमनागमनं तथा ॥ सर्वमाशु दहत्येव प्राणायामेन वै द्विजः ॥ ब्रह्महत्यादिपापादि नाशयेन्मास

गौतमी ८

मात्रकेः॥ प्रातः सायं च वेन्निन्यं षोडश प्राणसंज्ञयं॥ नाशयेत्स्व वै पापानि तूलराशिमिवानलः॥ सर्वेषामेव पापानां प्रायश्चित्तमिदं
स्मृतम्॥ स्वदेहस्थं यथा मन्त्रं धर्मो न्नुज्यन्निरामयः॥ प्राणायामांस्तथा पश्चात्यविद्या कामकर्मजां॥ अथवा किं बहूक्तेन मृणु गौतम
मः मद्वचः॥ प्राणायामं त्रिहि परं योगिनां मुक्तिसिद्धये॥ प्राणायामं विधायेत्स्वं देहं पीठानि विन्यसेत्॥ आधारशक्तिं प्रकृतिं कूर्म
भूकरमेव च॥ पृथिवीं क्षीरासिन्धुं च श्वेतद्वीपश्च मध्यतः॥ तन्मध्ये रत्नगेहं च सर्वाभीष्टफलप्रदं॥ गेहमध्ये कल्पवृक्षं सर्वरत्न
महोज्वलं॥ दक्षांशे दक्षिणकटौ तस्या वामदये पुनः॥ धर्मं ज्ञानं च वैराग्यं तिम्म मे देश्वरं तथा॥ उरवपार्श्वे नाभियार्श्वे न अपूर्वा स्नु
विन्यसेत्॥ विन्यसेव पुनर्हृदये मां विश्वमयं न्यसेत्॥ एकान्नपद्मदलं पत्रं विकारमयकेशवं॥ तन्मध्ये विन्यसेन्मन्त्री पश्चाशद्व
र्णकर्णिकां॥ प्रणवस्य त्रिभिर्मन्त्रैर्विन्यसेन्मण्डलत्रयं॥ कलाभिः सहितः तद्दश द्वादश षोडशैः॥ अकारोकारमपराः प्रणवा तंत्र
शो न्नवाक्षराः॥ ब्रह्मादिविष्णुमहेशाख्याः समष्टिव्यष्टिरूपकाः॥ समष्ट्या केवलं ब्रह्म सच्चिदानन्दलक्षणं॥ स्वबीजपूर्वकांस्तत्रस ८
त्वादीन्यथ विन्यसेत्॥ तदंशेनैव मतिमान्न्यसेदात्मचतुष्टयं॥ आत्मान्तरात्मपरमात्मज्ञानात्मश्च नेमताः॥ आत्मा सो जगवत्सलो

385

विश्वात्मा विरूश्वेपकः ॥ नासाग्रबीजसंहितं हृन्मध्ये च व्यवस्थितं ॥ अन्तरेव हृदिन्नासे वाग्वृत्तिर्हृदये स्थिता ॥ अन्तरङ्गन॰
याचारं अन्तरात्मा हृदन्तरे ॥ मनोमयस्तैजसाख्यश्चान्तरिन्द्रियवृत्तिधृक् ॥ अतएव मनेचायं अन्तरात्मेति कीर्त्यते ॥ अंबी
जश्चास्य गदितं तन्मूर्ध्वविन्यसात्सुधीः ॥ रमायात्मसुष्णाख्या मनोव्यावृत्तिहारकः ॥ विलये चेन्द्रिये तत्र सुसुखः केवलास्थितः
॥ पंबीजान्परमात्मानं यजेत्सर्वार्थसिद्धये ॥ संकर्षणश्चानिरुद्धः प्रद्युम्नश्चेति तत्त्रयं ॥ ज्ञानात्मासौ वासुदेवः स्वयन्तुः प्राज्ञ
रूपकः ॥ वृत्तित्रयविलीनात केवलं सुखचित्कलः ॥ सुखात्मा वासुदेवोऽसौ चित्कलाप्रकृतिपरा ॥ व्यञ्जनं तस्य प्र वक्ष्यामि के
वलं सुखचिन्मयं ॥ वेदत्रयोद्भुतं सारं सर्वकारणकारणं ॥ केशवेष्वस्यशक्तिश्च चास्यप्रकृतिरूपिणी ॥ मध्यशक्तिपराख्या
च चिदानन्दस्वरूपिणी ॥ विमलोत्कर्षणी ज्ञाना क्रिया योगा च शक्तयः ॥ प्रह्वी सत्या तथेशाना अनुग्रहा नवमा स्मृता ॥ नवश॰
क्तीश्चाविन्यस्य तत्र महामन्त्रं ॥ नमो भगवते प्रोक्ता सर्वभूतात्मने पदं ॥ वासुदेवपदं ङेन्तं सर्वात्मयोगसंयुतं ॥ विज्ञेयं च
ततो योगपद्मिनी चात्मने नमः ॥ अयं पीठमन्त्रः प्रोक्तः सर्वभूतात्मकः परः ॥ श्यामलं कोमलं धाम तत्रोपरि विचिन्तयेत् ॥ ॥

इति श्रीगौतमीयतंत्रे सर्वतंत्रोत्तमोत्तमे द्वितीयोऽध्यायः॥ ॥अथाखिलं न्यासजालं शृणुष्वावहितो नय॥ नित्यन्यासाः पू
र्णप्रोक्तो येर्विनाविफला भवेत्॥ मंत्रतंत्रात्मना सर्वाः प्रकारेणाप्यनुष्ठिता॥ कलाधिकोच्छ्रयान्न्यासान् समस्तग्रहबाधदान्॥ शृ
णु वक्ष्यामि विप्रेन्द्र येन विघ्नमयो भवेत्॥ स्वरषट्कं यथापूर्वं पश्चान्न्यस्वा षट्ककं॥ मूर्त्तिद्वादशकं तद्वद्वासुदेवेन संयुत
॥ हृदये माधवं चैव मंत्रेण सह संयुतं॥ गोविन्दं गलकूपे च वहेणेन प्रविन्यसेत्॥ विष्णुश्च दक्षिणे पार्श्वेऽरुणा सह प्रविन्य
सेत्॥ भूजान्ते दक्षिणे न्यसेत भर्गेण मधुसूदनम्॥ पद्मनाभं दक्षगले न्यसेद्धिप्रसुतायुतम्॥ दामोदरमथेन्द्रेण वामपार्श्वे
न्यसेत्सुधीः॥ भूजाने वासुदेवञ्च ब्रह्मणा सह प्राविन्यसेत्॥ वामगले सहर्षेणं पर्यानेन चाविन्यसेत्॥ दृष्टदेशे च प्रद्युम्नं त्वष्ट्रा
सह प्रविन्यसेत्॥ कक्षदेशेऽनिरुद्धं तं विष्णुसह विन्यसेत्॥ द्वादशाक्षरं मंत्रवत् विन्यसेत्कुसुमवन्धुके॥ वासुदेवो भवेत्साक्षा
त्व्याप्तिन्तस्य तेजसा॥ त्रिमात्रिकस्तु मनुमत्र समो भवतीति रवेन॥ वासुदेव चतुर्थ्यो च मंत्रोऽयं सुरपादपः॥ अस्यविज्ञान
मात्रेण वासुदेवः प्रजायते॥ मनुसंप्रोष्टितां न्यसेन्न्यासानुकाविष्णुमातरम्॥ तेनैव मंत्रसिद्धिः स्यात्पापसंघातनाशनात्॥ दश

186

रांगोलकन्यासं वक्ष्यामि भूतिदायकम्॥ मंत्रदशावृत्तिमयं गोपनीयं प्रजायते॥ आधारे गाध्वजे नाभौ हृदि गलमुखांशके
उरुद्वये कृष्णरायानाभ्यां कक्षौ स्तनद्वये॥ पार्श्वद्वये तथा श्रोण्यो मस्तकास्ये च नेत्रयोः॥ कर्णनासिकयोस्सद्यः कपाले करसं
धिषु॥ तदग्रे पादयोः संधौ तदग्रेष्वपि चादयात्॥ मस्तके तत्प्रतीच्यादिदिशासु व्यापकं न्यसेत्॥ दोष्णोस्तथोरुद्वये मंत्री शिरो
क्षास्यकराण्डदेशके॥ अक्षि हृद्गलकं वामजानुप्रपत्सु विन्यसेत्॥ श्रोत्रगण्डांशयोर्नास्यद्वक्षोजपार्श्वस्फिगङ्गैः॥ जानुजंघांघ्रि
युगले इत्थं वर्णान् प्रविन्यसेत्॥ विभूतिपञ्जरन्यासः सर्वभूतिप्रवर्त्तकः॥ दशतत्त्वं ततोन्यस्येद्दशार्णाशिघ्रसिद्धये॥ पृथिव्य
प्तेजो मरुद्वियद्धि पञ्चतत्त्वकम्॥ अहङ्कारो महत्तत्त्वं तथा प्रकृतिपूरुषौ॥ परङ्मानितत्त्वानि यथावदवधारय॥ पाद
गुह्यहृदयास्ये मूर्ध्नि पञ्चन्यसेत्ततः॥ हृदि द्वयं त्रयं व्याप्य सर्वाङ्गे विन्यसेत्सुधीः॥ मस्तकादितनोन्यस्येद्दशावृत्पादपर्यन्तकम्
अयं न्यासो गुप्ततमो मंत्राणां शीघ्रसिद्धिदः॥ कार्य्यो न्यपायिगोपालमंत्रेष्वपि विशालधीः॥ दशाक्षरस्य वर्णैश्च संहारक्रमतो
न्यसेत्॥ सृष्टिन्यासे मनोरस्य वर्णान्विपरीतान्न्यसेत्॥ एकैकाक्षरमुच्चार्य्य नमोऽनन्तं ततः पठेत्॥ परायेति च तत्त्वानि नम

गौतमी १० ज्ञेन मनसा सह ॥ मनसा वा मम सेव्यामासानुध्यैतेनाथवा मुने ॥ अङ्गुष्ठानामिकाभ्यां वा अन्यथा विफलं भवेत् ॥ ॥ इति श्री-
गौतमीयतंत्रे सर्वतन्त्रोत्तमे कामत्यागो नाम तृतीयोऽध्यायः ॥ ॥ अथ वृन्दावनं ध्यायेंसर्वदेवनमस्कृतम् ॥ सर्वर्तुकु-
सुमोपेतं पतत्रिगणनादितम् ॥ भ्रमद्भ्रमरझङ्कारमुखरीकृतदिङ्मुखं ॥ कालिन्दीजलकल्लोलशीतलानिलसेवितम्
नानापुष्पलतावद्धवृक्षषण्डैश्च मण्डितम् ॥ समानोदितचन्द्रार्कतेजोदीपितदीपितं ॥ कमलोत्पलकह्लारधूलिधूसरितान्त-
रम् ॥ शाखामृगगणाकीर्णं नानामृगनिनादितम् ॥ काञ्चीशब्दनसंवीतं वैकुण्ठादतिमोरवृन्दम् ॥ पुरन्दरमुखैर्देवैः सर्वतः स-
मधिष्ठितम् ॥ तन्मध्ये रत्नभूमिश्च सूर्यायुतसमप्रभाम् ॥ तत्र कल्पतरूद्यानं नियतं रत्नवर्षिणम् ॥ माणिक्यशिखरोल्लासितन्म-
187 ध्ये मणिमण्डपम् ॥ नानारत्नगणैश्चित्रं सर्वतेजोविराजितम् ॥ कलभाण्डलसच्चित्रवितानैरुपशोभितम् ॥ रत्नतोरणगोपूरमा- तंत्र
णिक्यदेदिकान्वितम् ॥ दिव्यघण्टायुतमुक्तामणिश्रेणीविराजितं ॥ कोटिसूर्यसमाभासं निर्मुक्तं षट्तरङ्गकैः ॥ बुभुक्षा च पिपा- १०
सा च प्राणस्य मनसस्तथा ॥ शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः ॥ चतुर्द्वारसमायुक्तं कपाटाद्यैकशोभितम् ॥ तत्र कल्पतरुं ध्या-

येत्पयविष्ठंरत्नवर्षिणां ॥ सेवितं ऋतुभिः सर्वैः सुधाशीकरवर्षिणाम् ॥ गारुत्मतदलसत्पत्रं प्रवालरत्नपल्लवम् ॥ मुक्तारत्नप्र-
सवितं पद्मरागफलोज्वलम् ॥ संसारतापविछ्छेदिकुशलछायमद्भुतम् ॥ तन्मूले चिन्तयेन्मन्त्री रत्नसिंहासनं शुभम् ॥ तत्र सू-
र्यसमाभासं पंकजं चाष्टपत्रकम् ॥ सर्वतत्वमयं तत्र चिन्तयेज्जगदीश्वरम् ॥ संसारसागरोत्तीर्णो धर्मकामार्थसिद्धये ॥ पीताम्ब-
रधरं कृष्णं पुण्डरीकनिभेक्षणम् ॥ रक्तनेत्राधरं रक्तपाणिपादतलं शुभम् ॥ कौस्तुभोद्भासितोरस्कं नानारत्नविभूषितम् ॥ उ-
द्दामविलसन्मुक्तारत्नहारोपशोभितम् ॥ श्रीवत्सवक्षसं चारुनूपुराद्युपशोभितम् ॥ रत्नैर्नानाविधैर्युक्तं कटिसूत्राङ्गुरीयकैः ॥ गो-
रोचनाकुंकुमेन ललाटतिलकान्वितम् ॥ अलकाशोभिसंयुक्तं पीताम्बरयुगावृतं ॥ विम्बाधरपुटोद्भासिवंशामृतरसान्वितम्
॥ बर्हिपत्रकृतापीडं वन्यपुष्पैरलंकृतम् ॥ कदम्बकुसुमोद्बद्धचारुमालाविराजितम् ॥ कोटिकन्दर्पलावण्यविलसत्कम्बुरोदर
म् ॥ वेणुं गृहीत्वा हस्ताभ्यां सुखसंयोज्य वादिनम् ॥ गायन्तं दिव्यगानैश्च वृन्दावनगतं हरिम् ॥ स्वर्गादिव परिभ्रष्टकन्यकाशतम
ण्डितम् ॥ गोगोवत्सगणाकीर्णं वृहत्परोऽश्वमण्डितम् ॥ गोपकन्यासहस्रैस्तु पद्मपत्रायतेक्षणैः ॥ अर्च्चितं भावकुसुमैस्त्रैलोक्य

करांकितं विभुम्॥ तुम्बुरुना नारदश्च वहाहाहूहूस्तथैव च। चित्ररथो मिथुनश्चापि श्रुत्वा गीतं तथा हरेः॥ वीणादिसाधनं त्यक्त्वा विस्मया
विष्टचेतसः॥ तेऽनुवासितमहात्मानं गायना विरतिस्थिताः॥ सिद्धगंधर्वयक्षैश्च अप्सरोभिर्विहङ्गमैः॥ स्थावरैः पन्नगैश्चापि सिद्धै
र्विद्याधरैस्तथा॥ शाखामृगैर्मेतुष्यैश्च वीक्ष्यमाणैः सुविस्मितैः॥ सर्वलक्षणसंपन्नं सौदर्येनाभिशोभितम्॥ मोहनं सर्वगोपीनां
लोकानां पतिमव्ययम्॥ नारदेनाच सिद्धेन विश्वामित्रेण धीमता॥ पराशरेण व्यासेन भृगुणाङ्गिरसेन च॥ दक्षेण सनकाद्यैश्च
सिद्धेण कपिलेन च॥ वासुदेवगीशहारीतयाज्ञवल्क्याश्चनकनु॥ मार्कण्डेयभरद्वाजमूलकण्ठलहादिभिः॥ वशिष्ठाद्यैर्मुनीन्द्रैश्च
स्तूयमानं सुरासुरैः॥ ब्रह्मलोकगतैः सिद्धैर्नागलोकगतैरपि॥ अन्यैरपि सुराद्यैश्चैः स्तूयमानं स्मरेन्नाविभुम्॥ एवं यश्चिन्तयेन्म
नीचेतसा कृष्णमव्ययम्॥ संसारसागरं घोरं समिदव्यदायते॥ ॥इति श्रीगौतमीयमहातंत्रे सर्वतंत्रोत्तमे चतुर्थोध्याय
ः॥ ॥गौतम उवाच॥ यद्यदुक्तं त्वया ब्रह्मन् तत्त्वं सर्वं श्रुतं मया॥ इदानीं परिपृच्छामि केनात्र चाधिकारितम्॥ नारद
उवाच॥ दीक्षायामधिकारित्वमाप्नोति गुरुसेवकः॥ द्विजानां तु पत्नीनां स्वकर्माध्ययनादिषु॥ यथाधिकारेणास्तीह संध्या

पासनकर्मसु ॥ तथाप्यदिक्षितानान्तं मंत्रतंत्रार्थनादिषु ॥ नाधिकारोऽस्त्यतः कुर्यादात्मानं शिवसंस्कृतं ॥ अतएव हि दीक्षार्थं सर्वे
ज्ञं गुरुमाश्रयेत् ॥ सुन्दरः सुमुखः स्वच्छः सुलभो बहुतन्त्रवित् ॥ असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः ॥ वेदवेदाङ्गवेदान्तसिद्धा
न्तज्ञानपारगः ॥ वाङ्मनःकायश्चित्तेश्चविदोषः सुञ्चपरोरतं ॥ विद्वं तन्त्वानुसंध्यायी विश्वविज्ञानवेदकः ॥ विस्रो समर्पकः स
म्यक् त्रिविधोत्पातकर्म्मणि ॥ सम्मतः सत्सुदानश्च मंत्रार्थज्ञानपारगः ॥ षट्चक्रभेदकुशलः षडध्वज्ञानपारगः ॥ पिण्डा
पदे तथा रूपे रूपातीतेति विवेचकः ॥ संध्यात्रयविशेषज्ञोऽध्वषट्कस्य विशोधकः ॥ मंत्रचैतन्यविज्ञाता गुरुक्रमः स्वयंभूवा ॥
नमाः सुगुरुवे तस्मै प्रत्यक्षाय यथाज्ञया ॥ मृद्भस्मदारूद्दशादः फलन्याविफलं फलम् ॥ पञ्चाम्नायविशेषज्ञो निग्रहानुग्रहक्ष
मः ॥ शिष्यस्य संशयच्छेत्ता गुरुर्भवति नापरः ॥ वैष्णवान्वयसिद्धान्तचिन्तामणिरिवापरः ॥ आश्रमी ज्ञानकुशलो गुरुर्भवति ना
परः ॥ मंत्रतंत्रार्थचैतन्यकुण्डलीगतिवेदकः ॥ मंत्रसिद्धान्तविधिवद्गुरुर्भवति नापरः ॥ सुदूरमपि गन्तव्यं यथाम्नायाविदो ज
नाः ॥ तेऽपि सन्त्यानमस्पाश्च सेव्याश्चाभीष्टमिच्छता ॥ एवंविधो गुरुर्ज्ञेय अन्यथा शिष्यदुःखदः ॥ शिष्यः कुलीनः शुद्धात्मा पुरुषा

र्थपरायणः ॥ अधीतवेदकुशलः पितृमातृहिते रतः ॥ धर्म्मविद्धर्म्मकर्त्ता च गुरुशुश्रूषणे रतः ॥ सदा शास्त्रार्थतत्वज्ञो दृढदेहो
दृढाशयः ॥ हिते रतः प्राणिनां नित्यं परलोकार्थकर्म्मकृत् ॥ वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः ॥ अनित्यकर्म्मणां त्यागी
नित्यानुष्ठानतत्परः ॥ जितेन्द्रियो जितालस्यो जितमोहो विमत्सरः ॥ गुरुवद्गुरुपुत्रेषु तत्कलत्रादिषु भक्तिमान् ॥ एवंवि
धो भवेच्छिष्यस्त्वितरो गुरुदुःखदः ॥ वर्षैकेन भवेद्योग्यो विप्रः सर्वगुणान्वितः ॥ वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः
॥ चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता ॥ यदा शिष्यो भवेद्योग्यः कृपया सद्गुरुस्तदा ॥ कृपया परया सम्यग्दीक्षा
याविधिमाचरेत् ॥ मन्त्रारम्भस्तु चैत्रे स्यात्समस्तपुरुषार्थदः ॥ वैशाखे रत्नलाभः स्याज्ज्यैष्ठे तु मरणं ध्रुवं ॥ आषाढे बन्धुनाश
ः स्यात्पूर्णायुः श्रावणे भवेत् ॥ प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः ॥ कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तथा भवेत् ॥ पौषे
तु शत्रुपीडा स्यात्माघे मेधाविवर्द्धनं ॥ फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् ॥ पञ्चाङ्गशुद्धिदिवसे स्वोदये चन्द्रसूर्ययोः
गुरुशुक्रोदये चैव शस्यते मन्त्रसत्क्रिया ॥ रवौ गुरौ सिते सोमे कर्त्तव्यं बुधशुक्रयोः ॥ शुक्लपक्षे शुभा दीक्षा कृष्णे स्यात्पंचमावधि

वादश्यां सर्वथा कार्य्या चामलायां शुभेऽनि ॥ कृष्णाप्रिया वादशी सा कृष्ण दीक्षाप्रवर्त्तिता ॥ उत्तरात्रयरोहिण्यां रेवती पुष्य वासवे
॥ धनिष्ठा वायुमित्राश्विपित्र्यां त्वाष्ट्रिस्त्रु नैर्ऋतं ॥ ऐशवैष्णवहस्ता च दीक्षायां तां शुभावहाः ॥ अश्विनी रोहिणी स्वाती विशाखा हस्त
भेषु च ॥ कृष्णोत्तरात्रये पुष्ये वं कुर्यान्मन्त्राभिषेचनं ॥ शुभयोगेषु सर्वेषु दीक्षा सर्वशुभप्रदा ॥ शुभानि करण्याहु दीक्षायाञ्च वि-
शेषतः ॥ शकुन्यादीनि विष्टाञ्च विशेषेण विसर्ज्जयेत् ॥ चरः सर्वविमर्य्योः स्यात् स्थिरराशिषु सौख्यदा ॥ त्रिषडायगताः पापाः शु-
भा केन्द्र त्रिकोणगाः ॥ दीक्षायां च शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः ॥ शिष्यस्य जन्मसंस्थानौ विष्णुवेश्मयनेन तथा ॥ अन्येषु पूर्णयो-
गेषु ग्रहणे चन्द्रसूर्ययोः ॥ शिष्यानुकूलकाले वा दीक्षा सर्वशुभावहा ॥ सूर्य्यग्रहणकालेषु नान्यदन्वेषितं भवेत् ॥ तत्र यद्यत्
कृतं सर्वमनन्तफलदं भवेत् ॥ विना यासेन मंत्रस्य सिद्धिर्भवति नान्यथा ॥ भूमेः परिग्रहं कुर्याद् षावसायनन्नं भवेत् ॥ शुक्ला
मृत्स्ना च या भूमि ब्राह्मणी सा परिकीर्त्तिता ॥ क्षत्रिया रक्त मृत्स्ना च हरिद्वैश्या प्रकीर्त्तिता ॥ कृष्णा भूमिर्भवेत् च शूद्रा परिकीर्त्तिता ॥
ब्राह्मण्यां सर्वार्थसिद्धिः स्यात् क्षत्रिया राज्यदा मता ॥ धनधान्यकरी वैश्या शूद्रा तु निन्दिता मुने ॥ ततो भूमिं परीक्षेत वा स्तु ज्ञानविशा-

रदः ॥ अस्यादिशोधनं कुर्यात्तु शाजागादिहारयेत् ॥ एतस्याकरणो मंत्री न किंचित्फलमाप्नुयात् ॥ विप्राशिषा वेदघोषैर्मङ्गलाचा
रपूर्वकं ॥ वास्तोर्मण्डलकं कुर्याद्यथाशोभं तथाविधि ॥ पूर्वापरायतं सूत्रं विन्यसेद्दक्षमानतः ॥ तन्मध्ये किंचिदालक्ष्य मत्स्यौ द्वौ
परितो लिखेत् ॥ तयोर्मध्ये स्थितं सूत्रं विन्यसेद्दक्षिणोत्तरं ॥ ताभ्यां द्वाभ्यां तथा ताभ्यां कोणेषु मकरान्लिखेत् ॥ मत्स्यमध्ये स्थितान्प्रा
णितत्र सूत्राणि पातयेत् ॥ चतुरस्रं भवेत्तत्र चतुष्कोष्ठसमन्वितं ॥ इशानाद्यक्षसंपातं यावद्यावदग्रे प्रभञ्जनं ॥ एवं सूत्रद्वयं पा
यात्कोणसूत्रं समाहितः ॥ वास्तुमध्यं पूजयेद्देहे मध्यकोष्ठचतुष्टये ॥ दिक्चतुष्के पुपूर्वादि यजेदवाह्यं सत्तमः ॥ विवस्वन्तं ततो
मित्रं महीधरमनन्तरं ॥ कोणार्द्धे कोष्ठद्वन्द्वेषु वह्न्यादि यातः पुनः ॥ सावित्रं सवितारं च शक्रमिन्द्रजयं पुनः ॥ रुद्रं रुद्रजयं विद्वा
नापश्चाप्य पराशकं ॥ तत्कोणसूत्रोभयतः कोष्ठद्वन्द्वेषु देशिकः ॥ सर्वं गुप्तं चार्यमणं जातवं पिलिपिञ्छकं ॥ चरकीं च विदारीं च पूत
नामचैव यजेत्क्रमात् ॥ अन्ये यदिक्षु पूर्वादि सार्द्धाप्येषु पदेषु मान् ॥ आरभ्य वरुणविभागेन देवतादेशिकोत्तमः ॥ क्रमादीशानपर्यन्तं
जयन्तः शक्रभास्करौ ॥ सत्या वृषान्तरीक्षौ च दिशि प्राच्यां व्यवस्थिताः ॥ अग्निः पूषा च वितथो यमश्च गृहरक्षकः ॥ गंधर्वो भृङ्गराजश्च

190

मृगोदक्षिणादिग्गता ॥ नैरृतिर्दौवारिकश्च सुग्रीव वरुणो नत ॥ पुष्पदन्तो सुरो शोषयोगो भ्रमगृदिशि स्थिता ॥ वायुर्नागश्च मुकर
ःसोमोभल्लाटएव च ॥ अर्गलाख्यादित्यदितीकुवेरस्याद्दिशि स्थिता ॥ भक्तानामपि देवानां पादान्या पूर्व्यपश्चभिः ॥ रजोभिस्तेषथातस्यं ः
पायसान्नेर्वलिं हरेत् ॥ पायसैर्मधुरैः सर्वान् संयजेन्मधुरान्वितानतत ॥ ततद्द्रव्यैर्वर्णैर्मतिमान् पूजयेद्दोषशान्तये ॥ पायसोदनला
जेश्चयुक्तं धूपप्रसूनके ॥ अन्नादिभिः संयुक्तं माषभक्तादिमण्डितं ॥ गृहाणेमं वलिं ब्रह्मन् वास्तुमायं प्रणाशय ॥ गंधादिशर्करा पू
र्वेपायसपरिसंयुतं ॥ आर्य्यकाख्य गृहानेमं सर्वदोषप्रणाशय ॥ चन्दनाद्यर्च्चितेनाथकर्पूरागुरुसारिण्तं ॥ विवस्वन्वै गृहानेमं सर्वे
दोषं प्रणाशय ॥ सगुडं पायसं नाथ पुष्पादियसमान्वितं ॥ गृहानेमं वलिं पृथ्वीनित्यशान्तिं प्रयच्छ मे ॥ माषोदनेसमांसंच गंधादिक्षीर
संयुतं ॥ गृहानेमं महीभूतं सर्वदोषप्रणाशय ॥ एवमभ्येतु संपूज्य ईशानादि वलिं हरेत् ॥ क्षीरखण्डसमायुक्तं पुष्पादिभिरलङ्कृतं
गृहानेमं वलिं ह्यमायच्छान्तिं प्रयच्छ मे ॥ दधीदं गुडसंयुक्तं गंधादिभिः सुसंस्कृतं ॥ गृहानेमं वलिं वन्नावि घ्रमात्र प्रणाशय ॥ पुष्पा
दिकुशपानीयं शर्करागुरुवासितं ॥ सावित्र वै गृहाणेमं शान्तिं मंत्र प्रयच्छ मे ॥ पिष्टकं सगुडं नाथ रक्तगंधादिशोभितं ॥ गृहाणेमं व

लिं सूर्य्यविघ्नमात्रप्रणाशाय ॥ शितमन्नं तथा पुष्पं कुंकुमादि समन्वितं ॥ गृहाण मं बलिं हृष्यं शक्र देव नमोस्तु ते ॥ ओदनं घृत
संयुक्तं सस्त्रगंध्यादि मारिकं ॥ गृहाण मं बलिं हृष्यं मिन्द्रदेव नमोऽस्तु ते ॥ पक्वापक्वामिदं मांसं वस्त्रधूप्यादि संयुतं ॥ गृहाण मं बलिं
हृष्यं रुद्रमेव नमोस्तु ते ॥ समांस घृत संपक्वं गंधधूप्यादि संयुतं ॥ गृहाण मं बलिं रुद्र जय स्वस्ति प्रयच्छ मे ॥ रक्तपुष्पं समांसं वेर
क्त वस्त्रादि संयुतं ॥ विदारि वै गृहाण मं रक्षोविघ्नविनाशय ॥ मांस धूप्यादि संयुक्तं माषभक्तो परिस्थितं ॥ गृहाण मं बलिं स्कन्द र
क्षोविघ्नं विनाशय ॥ समांसं पिष्टकैर्युक्तं पक्वमांसोदकान्वितं ॥ अर्वमन्वै गृहाण मं रक्षोविघ्नविनाशय ॥ रक्तमांसोदनं मत्स्यं गंध
धूपसमन्वितं ॥ जन्तकन्तं गृहाण मं रक्षोविघ्नविनाशय ॥ सघृतं चाक्षतं नेत्रं वस्त्रगंधाद्यलंकृतं ॥ गृहाण मं बलिं स्कन्द रक्षोविघ्न
विनाशय ॥ समांसपिष्टकैर्युक्तं पक्वमांसोदकान्वितं ॥ अर्यमन्वै गृहाण मं रक्षोविघ्नविनाशय ॥ रक्तमांसोदनं मत्स्य गन्धधूपसम
न्वितं ॥ अन्तकत्वं गृहाण मं रक्षोविघ्नविनाशय ॥ सघृतं चाक्षतं नेत्रं वस्त्रगंधारलंकृतं ॥ गृहाण मं बलिं त्वीशवायुदोषप्रहायकं ॥ उ
त्पलं पायसैर्युक्तं वस्त्रादिकसमन्वितं ॥ गृहाण मं बलिं हृष्यं भास्कराय नमोऽस्तु ते ॥ विनानं धूम्रवर्णाभं गंधादिकसुशोभितं ॥ वस्त्रयु

नां गृहाणेमं बलिं सद्यो नमोऽस्तु ते ॥ इदन्नमांसमत्स्यैव वस्त्रगंधादिपूजितं ॥ गृहाणेमं वृष बलिं वासुदेवप्रणाशय ॥ इदन्नं शार्दूलमां
सनैवेद्यादिकसंयुतं ॥ गृहाणेमं बलिं हृद्यं व्योमशान्तिप्रय छमे ॥ सुवर्णमिष्टकस्वाथ वस्त्रगंधादिभिर्युतं ॥ घृतान्वितं गृहाणेमं सप्त
जिह्व नमोऽस्तु ते ॥ क्षीरं लाजामांसयुक्तं रक्तपुष्पादिसंयुतं ॥ गृहाणेमं बलिं हृद्यं पूषदेव नमोस्तु ते ॥ दधिगंधादिभिर्युक्तं पीतपुष्पस
मन्वितं ॥ बलिं प्रगृह्यतां सोम सर्वदोषप्रणाशय ॥ ओदनं घृतसंमिश्रं गंधपुष्पसमन्वितं ॥ गृहाणेमं बलिं हृद्यं भल्लाटक नमोस्तु ते
माषान्नं घृताभ्यक्तं गंधपुष्पादिमण्डितं ॥ गृहाणेमं बलिं हृद्यं अर्गलाख्य नमोस्तु ते ॥ पूलिकां मधुसंमिश्रां वस्त्रगंधादिसंयुतां ॥ गृ
हाणेमं बलिं हृद्यं देवमातर्नमोऽस्तु ते ॥ क्षीरं खण्डसमायुक्तं नानापुष्पोपशोभितं ॥ दैत्यमातर्गृहाणेमं सर्वदोषप्रणाशय ॥ स्वर्गपा
तालमध्ये च ये देवा वास्तुदेवताः ॥ गृह्णन्तिमं बलिं हृद्यं तु स्थापानस्य मन्दिर ॥ मातरो भूतवेतालाये चान्ये बलिकाङ्क्षिणः ॥ विघ्नोः
पारि यदाये च तेपि गृह्णन्त्विमं बलिं ॥ पितृभ्यः क्षेत्रपालेभ्यो बलिं दत्वा प्रकामतः ॥ अभावे रक्तसूत्रैश्च कुशपुष्पादिभिर्यजेत् ॥ ॥
इति श्रीगौतमीयतंत्रे सर्वतमोतमपञ्चमोऽध्यायः ॥ ॥ भूमिशुद्धिं विधाये ॥ रचयेद्यागमण्डलं ॥ नवहस्तं पञ्चहस्तं द्वि

गौतमी·
१५

हस्तं वा यथामति ॥ कर्त्तुर्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्वणः ॥ मध्यमस्य दैर्घ्यमानेन मानाङ्गुलमुदीरितं ॥ गृहादिकुण्डकरणं मण्ड-
लं वेदिकास्तथा ॥ मानाङ्गुलेन वै कर्त्तव्यं नान्येनापि कदाचन ॥ प्रतिमाकरणं चैव मानाङ्गुलमुदीरितं ॥ वापीकूपतडागादिदीर्घिकाह्र-
दमेव च ॥ गृहस्थाङ्गुलेन मतिमान् कारयेन्मलहेतवे ॥ रथादिदोलिकाचैव योतं शकतमेव च ॥ नखाङ्गुलेन कर्त्तव्यं नान्येन तु कदा-
चन ॥ गृहस्थकुलप्रमाणानि यानि किञ्चित्कथितानि च ॥ यजमानस्य कर्तव्यं नान्यस्यापि कदाचन ॥ मसृणं रचयेद्गेहं षोडशानं तु सं-
यतं ॥ मध्ये चतुष्कयं तत्र नागपाशादशादिभिः ॥ चतुर्द्वारसमायुक्तं चतुष्कोणसमन्वितं ॥ विश्वकर्मानुष्ठितेन यथाशोभं निवेदये-
त् ॥ अष्टदिक्षु ध्वजानस्थान तद्दिक्पालवर्णेन ॥ पुष्पमालावितानाद्यैः संवेष्ट्य यं मनोहरं ॥ अस्याग्नेये चोत्तरे वा रचयेद्यज्ञमण्ड-
पं ॥ तत्तन्त्रस्य चैकगेहे चकुण्डमेव विनिर्म्मयेत् ॥ मध्ये च वेदिकां कुर्याद्धस्तेनोदरवर्तुभां ॥ सप्तपानं तस्य भागस्य चैकभागेन निर्म्मि-
तां ॥ भूमिमात्रोन्नतां सर्वलक्षणैर्लक्षणान्वितां ॥ ततः कुण्डं च खनयेल्लक्षणं तस्य मे शृणु ॥ हस्तमात्राणि कुण्डानि दीक्षार्च्चास्थापना-
दिषु ॥ चतुरस्रं योनिमर्द्धचन्द्रं त्र्यस्रं सुवर्तुलं ॥ षडस्रं पङ्कजाकारमष्टास्रं पञ्चकोणकं ॥ सप्तास्रनं ततः कुर्याद्विदिक्षु च यथाक्रमं ॥

तंत्र
१५

192

पूर्वस्यां चतुरस्रं तु आग्नेय्यां योनिसन्निभं ॥ अर्द्धचन्द्रं तथा वाम्यां त्रिकोणं नैरृत्यां तथा ॥ वारुण्यां वर्त्तुलं चैव षडस्रं वायुगोचरे
उत्तरस्यां पद्मकुण्डं ऐशान्याम् अष्टकोणकं ॥ नैरृतिवरुणयोर्म्मध्ये सप्तास्रं मधुदाहृतं ॥ वायुरुत्तरयोर्मध्ये पंचकोणात्मकं शुभं
॥ आचार्यकुण्डं मध्ये तन्महेन्द्रेशानयोरपि ॥ पूर्वापरायतं सूत्रं हस्तमात्रं प्रसार्य च ॥ तस्याग्रयोर्मत्स्यद्वयं कुर्यात् स्पष्टं यथा भवे
त् ॥ द्विभागीकृत्वा तत्सूत्रं पातयेद् दक्षिणोत्तरं ॥ तदग्रयोर्मत्स्ययुग्मं कुर्यात्स्पष्टं यथा भवेत् ॥ चतुर्दिक्षु चतुःसूत्रं पातयेत्तत्प्रमाण
तः ॥ चतुरस्रं चतुष्कोणं भवेदति मनोहरं ॥ कोणसूत्रद्वयं दद्यात् प्रमाणेन न रक्षयेत् । चतुरस्रं भवेत् कुण्डं सर्व्वलक्षणलक्षितं
॥ ब्राह्मणः क्षत्रिये वैश्ये शूद्रेश्च समनुष्ठितं ॥ सर्वकर्मकरं प्रोक्तं शान्त्यादि षट्सु कर्म्मसु ॥ अनेन जनयेत् सर्वं कुण्डानि मनुरुत्तमः
ततः कुण्डं खनेन्मंत्री यथाशास्त्रविधानवित् ॥ न्यस्त्वा सर्वस्य गात्रस्य शिरोदेशं प्रयत्नतः ॥ शिरोघातान्भवेन्मृत्युः पिण्डे तु पिण्डघात
नं ॥ पृष्ठे च दुःखसंभूतिः क्रोडे सर्वार्थसाधनं ॥ यावान् कुण्डस्य विस्तारः खननं तावदीरितम् ॥ कण्ठमेवाङ्गुलिं न्यस्त्वा मेखलास्तिस्र
एव हि ॥ कुण्डस्याङ्गुलमानेन वेदाग्निनयनाङ्गुला ॥ चतुरस्रं भवेयुस्ताश्चतुरस्राः सुशोभनाः ॥ होतुरग्रे योनि वा सां कुण्डगर्भसं

निभा ॥ षट्चतुर्थाङ्गुलायामो विस्तारोन्नतिशालिनी ॥ सप्ताङ्गुलाभवेद्दीर्घा चतुरङ्गुलविस्तृता ॥ षडङ्गुलाचोन्नतायोनिर्विनालक्षणल-
क्षिता ॥ स्थूलादारभ्य तालं स्यात्सरन्ध्री योनिमध्यतः ॥ सूक्ष्माग्रं स्थूलमूलञ्च सरन्ध्रं नालमिष्यते ॥ योन्यामध्याविलं कुर्यात्तदात्मग्रा-
हिसंज्ञकं ॥ कुण्डमध्ये भवेन्नाभिः पद्मं वा चतुरस्रकम् ॥ षडङ्गुलं चोन्नतं तत्तु चतुरङ्गुलविस्तृतम् ॥ अष्टाङ्गुलन्तु योन्यग्रं कुर्याद्दीर्घ-
दधोमुखं ॥ यावद्यत्प्रमाणेन कुण्डेऽन्यत्र वर्द्धयेत् ॥ कण्ठन्तु षडङ्गुलं तत्र वर्द्धयेत्कुण्डमानतः ॥ चतुरस्रस्य कुण्डस्यैकहस्त-
मितस्य च ॥ कर्णसूत्रप्रमाणेन द्विहस्तं कुण्डमुद्धरेत् ॥ सर्वकुण्डेषु सर्वत्र वर्द्धयेद्विधिनामुना ॥ कुण्डन्तु प्रकृतिः सूक्ष्मा सर्वलक्षण-
लक्षिता ॥ उभौ पादौ करौ तस्य भवेत्कोणचतुष्टयम् ॥ उदरं कुण्डमित्युक्तं योनिः कारणरूपिणी ॥ तेन तत्रैव वह्न्यान्यं निधातुं तन्म-
यन्ततः ॥ फलं वितनुते सम्यगन्यथा विफलायते ॥ चतुरस्रं समं कृत्वा पञ्चभागैकभागकम् ॥ वर्द्धयेत्तु ततस्तस्य मध्यसूत्रसमान- तंत्र
तः ॥ कर्णात्कर्णगतं सूत्रं कृत्वा भागचतुष्टयम् ॥ भागेनैकेन कोणार्द्धं संस्थाप्य भ्रामयेत्ततः ॥ आमध्यसूत्रात्सामध्यात्सूत्रयुग्मं ततो- १६
न्यसेत् ॥ तस्मात्ताहृद्भिपर्यन्तमेवं स्याद्योनिसन्निभम् ॥ चतुरस्रीकृते क्षेत्रे चतुर्द्धा भेदिते तथा ॥ भागमेकन्त्यजेत्पूर्वपश्चिमे चैकभाग

कम् ॥ मध्येसूत्रं समादाय तन्मानात्भ्रामयेत्ततः ॥ दक्षिणार्द्धेनार्द्धचन्द्रमेवं स्यात्सुमनोहरम् ॥ समस्य चतुरस्रस्य अधःसूत्र
स्य पार्श्वयोः ॥ अङ्गुलद्वितयं दत्त्वा मूर्द्धं दद्यात्षडङ्गुलं ॥ मध्येसूत्रसमानेन सूत्रयुग्मं ततो न्यसेत् ॥ त्र्यस्रं प्रकातिदं प्रोक्तं पूर्वोन
नसमीहृदम् ॥ अष्टधाभेदितं क्षेत्रं परिकल्प समानतः ॥ एकैकभागमध्यस्य पार्श्वयोः परिकल्पयेत् ॥ मध्येसूत्रेषु संस्थाप्य
तन्मानाद्भ्रामयेत्ततः ॥ वर्त्तुलं वर्त्तुलं कुण्डं भवेदतिमनोहरम् ॥ पश्चात्सकोणं विभज्य सप्तधा क्षेत्रं वेदास्रं स्यैकभागकम् ॥ त
द्बहिर्न्यसेत् सूत्राग्रं पूर्ववत्सप्रमार्ज्य च ॥ तन्मानाद्भ्रामयेद्वृत्तं भूयोऽपि चतुरस्रकं युगांशीकृत्य नो कोशेस्त वृत्तं पूर्वमादि
तः ॥ पञ्चधा चिह्नितं कृत्वा चिन्हाच्चिन्हं विचक्षणः ॥ भूयश्च पञ्चसूत्राणि समस्यागास्फालयेत्क्रमात् ॥ एतत्पञ्चास्रं कुण्डं स्यात्
सप्तकोणमिहोच्यते ॥ अष्टधाभेदिते क्षेत्रे मध्येसूत्रसमानतः ॥ वर्द्धयेद्भागमेकैकं चतुर्दिक्षु विचक्षणः ॥ चतुर्दशाङ्गुलं चाधउ
र्द्ध तन्मानतो न्यसेत् ॥ यथा मध्ये भवेन्मध्ये सूत्रं चात्रिंशदङ्गुलं ॥ षट्सूत्रलाञ्छनात्तत्र जायते तु षडस्रकं ॥ पूर्वोक्तवृक्षकुण्डस
मर्द्धोच्चमेखलोपरि ॥ षोडशान्ते सुरम्याणि यन्मपत्राणि संलिखेत् ॥ अजकुण्डमिति ज्ञेयं वेदवेदान्तपारगैः ॥ अथ सप्तास्र

गौतमी कुण्डम्॥ दशांशी होमवेदास्तं एकांशेनैव वा युतः॥ मध्ये प्राक्सूत्रपूर्वाग्रं वर्द्धयित्वा तु देशिकः॥ तन्मानां भ्रामयेद्वृत्तं भूयोऽपि
७ चतुरस्रकम्॥ चतुःषष्ठिविभागेन विभज्य विंशद्दशकैः॥ सत्रित्रिकेष्वरेखायां सप्तधा लाञ्छयेत्सुधीः॥ चिह्नाद्विचिह्नं त
द्दीर्घं सप्तसूत्राणि पातयेत्॥ सप्तकोणात्मकं कुण्डं भवेदेवं मनोहरम्॥ चतुरस्रे समक्षेत्रे कोणसूत्रीकृते गुरुः॥ मध्यसू
त्रं समादाय क्षेत्रार्द्धं परिकल्पयेत्॥ मध्ये सूत्रन्तु संस्थाप्य कोणार्द्धं स्थापयेद्ध्रुवः॥ ततोऽतिरिक्तं यत्कोणे तदर्द्धं दिशि वर्द्धयेत्
अन्यतेनैव मानेन चतुरस्रं बहिर्भवेत्॥ बाह्यस्य चतुरस्रस्य द्वादशाङ्गुलमानतः॥ अग्रदिक्षु क्षिपेत्सूत्रमष्टास्रं कुण्डमुत्तमम्
१५५ ॥ वृत्तं वा चतुरस्रं वा अष्टास्रं वा गुरोर्भवेत्॥ एवम्विधानि कुण्डानि परिकल्प्य समन्ततः॥ सात्त्विकी मेखला पूर्वा द्वितीया राज
सी स्मृता॥ तृतीया तामसी ज्ञेया इत्युक्तं कुण्डलक्षणम्॥ मण्डपस्यान्तरे भागे शालाः पूर्वापरोन्नतां॥ गूढं कुर्यात् यथाशोभां सर्वे तंत्र
साक्षि मनोहराम्॥ पूर्वापरायतं तत्र पञ्च सूत्राणि पातयेत्॥ मध्ये मध्ये विलूप्ये च तथा द्वादशकोष्ठकम्॥ मंचवर्णरजोभिस्तु प ७
दानि तानि पूरयेत्॥ पालिकाः पंच मुख्याश्च सरावाणि च पातयेत्॥ द्विषट्कुम्भस्य चतुर्विंशत् दुग्धानि यथाक्रमं॥ तावन्मात्रमुरवा

न्मूर्द्ध्यडानि परिकल्पयेत् ॥ तत्त्रिभागाञ्जलिमुखैर्विस्तृतानि प्रकल्पयेत् ॥ नारायणमहेशानब्रह्मरूपाणि तानि च ॥ पालिकाः प
ञ्चमुखाश्च सरावाणि ततः परम् ॥ प्रक्षालितानि मन्त्रेण प्रणपानि तानि चैव हि ॥ संवेष्टितानि परितः त्रिगुणैः शुभतन्तुभिः ॥ मृद्वा
लुकाकरीषैश्च पूरितानि समन्ततः ॥ समर्च्चितस्वदेवश्च पश्चिमादिक्रमेण च ॥ बिम्बस्य पालिकाद्या मा कापि यक्तु फलसर्वपात्
॥ मुद्गमाषौ तिलाश्शिम्बी कुलत्थश्चाढकी तथा ॥ प्रक्षालितानि शुद्धेन जलेन तदनन्तरम् ॥ अभ्यर्च्चितस्वदेवानि मूलमन्त्रार्च्चितानि
वै ॥ विप्राशिषा पञ्चघोषैः महद्भिः मर्य्यतानरव ॥ विषिच्य तु हरिद्राभिर्नमस्य च पुनः पुनः ॥ वसनेन समाच्छाद्य नवीनेन ततः प
रम् ॥ शुद्धाभिरद्भिः सिच्याथ सायं प्रातर्मुहुर्मुहुः ॥ इत्येवं सप्तरात्रं वा नवरात्रमथापि वा ॥ स्थापयेद्दापरेच्चैव रात्रिशेषवलिं
निशि ॥ लाजतिलहरिद्राश्च शक्तुचूर्णं तथा दधि ॥ एतैः प्रथमरात्रौ च भूतेभ्यो वलिमुत्सृजेत् ॥ द्वितीयायां क्षिपेद्रात्रौ पितृभ्यस्तिल
तण्डुले ॥ तृतीयायाञ्च यक्षेभ्यः सलाजदधिशक्तुभिः ॥ चतुर्थ्यां रजन्यां दद्यान्नागेभ्यश्चन्दनं वलिम् ॥ नारिकेलोदकैर्मिश्रं शक्तुचूर्णं
मनोहरम् ॥ पञ्चमां क्षतं ब्रह्मरौद्रश्च पञ्चम्यामुत्सृजेद्वलिम् ॥ सप्तमम्यन्नं भागाय्यमश्यामथ समाहरेत् ॥ गुडोदनविश्वैव च सप्त

गौतमी· म्यां विचरेद्बलिम्॥ अष्टम्यां मातृकाभ्यश्च छागैर्मांसैश्च पक्षिभिः॥ मीनैस्तथा च मधुभि राहरेद्बलिमुत्तमम्॥ तिलौदनैर्वि
१८ ष्णवे च नवम्यामाहरेद्बलिम्॥ प्रणवादि चतुर्थ्यन्तं स्वनाम च नमोऽन्तकम्॥ बलिमंत्रं समैवस्याद्वाहनविसर्जनम्॥ विवि
धानाञ्च पत्राणां परितो वहिरेव च॥ अष्टदिक्षु च संदद्याद्ब्रह्मकपालेषु यत्नतः॥ प्रोक्तेषु तेषु पात्रेषु विस्नुत्रसहृदान्यजेत्॥ सु
रुपियत्नानिष्यावेवात्रुराग्निः कलंथके॥ आघारव्यां रक्षसां चिन्त्याहृयासिद्धात्रके तथा॥ प्राणपतिं शालिराजे देवौ वैवस्वतास्ति
ले॥ इन्द्ररूपामेराजमासे वरुणाश्च तथा मुने॥ वस्त्रावरोऽदृढे व ध्यावाविन्द्विना किञ्चिन्यवंक्षिपेत्॥ उद्धृतं यामद्वितीये समतीते च
वापयेत्॥ वीजानां देवतं सोमः सप्तैर्वा कान्तिमान् यतः॥ तस्मादाहृत्य वीजानि निशायामेव वापयेत्॥ प्ररूढान्यङ्कुराण्येव नादी-
क्षेत कदाचन॥ आचार्य्यःस्वयं प्रविशेत तन्न द्विष्यो वा नदाज्ञया॥ प्ररूढैरङ्कुरैः कर्त्तुर्निर्द्दिष्टो च शुभाशुभम्॥ श्यामैः कृष्णै रङ्कुरैश्च तंत्र
अर्थहानिश्च दुःखवान्॥ कुजैर्धनं विप्रकृष्टे मृतिर्भर्यान्न संशयः॥ आवर्य्यःपारग्रैश्चैव प्रलयमवीक्ष्य यत्नतः॥ शान्तिकं सर्वथाकु १८
र्य्यात्मन्तुष्टि शिनाम सिद्धये॥ ॥ इति श्रीगौतमीयतंत्रे सर्वतंत्रोत्तमोत्तमेऽष्टोऽध्यायः॥ ॥ अथ दीक्षां प्रवक्ष्यामि सर्वसिद्धिप्रवर्त्ति

195

काम् ॥ यां विना नैव सिद्धिः स्यान्मन्त्रो वर्षशतैरपि ॥ तदहं कथितं पूर्वमिदानीं कथ्यते शृणु ॥ ददाति दिव्यभावञ्च क्षिणुयात्
पायसन्तति ॥ तेन दीक्षेति विख्याता मुनिभिस्तन्त्रपारगैः ॥ शिष्यः स्नातः सुवेशश्च सर्वद्रव्यसमन्वितः ॥ आचार्य्यं वृणुयात् भ
क्त्या वस्त्रालंकारभूषणैः ॥ कृत्वा नान्दीमुखं श्राद्धं ब्राह्मणान् परितोषयेत् ॥ गोभूहिरण्यवस्त्राद्यैस्तोषयेत् गुरुमात्मनः ॥ य
था ददाति सन्तुष्टः प्रसन्नवदनो मनुम् ॥ इदानीं पूर्वकल्पस्य प्रसङ्गात् कथयामि ते ॥ यत्कृत्वाधिकारितां याति मंत्रयंत्रार्च्चनादि
षु ॥ येन विना न सिद्धिः स्यान्नरकञ्च प्रलभ्यते ॥ ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेत् गुरुदैवतम् ॥ स्वमूर्द्धनि सहस्रारे कृत्वा स्वे
परिविन्दुके ॥ शशाङ्कायुतसङ्काशं वराभयलसत्करम् ॥ शुक्लाम्बरधरं श्रीमच्छुक्लमाल्यानुलेपनम् ॥ वामारोपितशक्त्या चयु
तं कृपात्मकमव्ययम् ॥ शिवं नैकं समुत्रीय ध्यायेत् परगुरुं धिया ॥ मानसैरुपचारैश्च सन्तर्प्य मनसा सुधीः ॥ स्तोत्रैः स्तुत्वा नम
स्कृत्यामंत्र्य देवेशमर्चयेत् ॥ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै स्वगुरवे नमः ॥ अखण्डम
ण्डलाकारं व्याप्तं येन चराचरम् ॥ तत्पदं दर्शितं येन तस्मै स्वगुरवे नमः ॥ मूलाधारे त्रिकोणाख्ये कोटिसूर्य्यसमान्विते ॥ ध्याये

न्कुण्डलिनींनित्यांकामबीजोपरिस्थिताम्॥इच्छामांसूक्ष्मांच्चविश्वस्यसृष्टिस्थितिलयात्मिकाम्॥विश्वातीतांज्ञानरूपांचिंत
येदूर्द्धवाहिनीम्॥चक्रषट्कंविनिर्भिद्यप्रापयित्वापरेशिवे॥तदभेदसयायन्नामनाकुलमनाःस्मरेत्॥प्रापयित्वासुधां
पूर्वंप्लावयेच्छक्तिमण्डलम्॥तेनैवचक्रभेदेनमूलाधारंसमापयेत्॥अनेनध्यानयोगेनमंत्राःसिद्ध्यन्तिनान्यथा॥वैरिपक्षे
स्थितायेचवृद्धायौवनगर्विताः॥येचान्येदामदुष्टाश्चासिद्ध्यन्त्येवनचान्यथा॥परेणचस्वमात्मानंकृत्वाख्येनविभावयेत्॥अ
हंकृत्स्नोनचान्योऽस्मिरक्षैवाहंनशोकभाक्॥सच्चिदानन्दरूपोऽहंनित्यमुक्तःस्वभाववान्॥त्वमेवाहमहंत्वञ्चसच्चिन्मा
त्रवपुर्भवान्॥आवयोरन्तराकृष्टंनइष्टत्यात्रावलात्तव॥अहंतीर्णोभवंघोरंकृत्यंकिञ्चिन्नमेऽस्तिहि॥तथापिदेहिमेना
थआज्ञांतवनिषेवणे॥जानामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंनचमेनिवृत्तिः॥त्वयाहृषीकेशहृदिस्थितेनयथानियु
क्तोऽस्मितथाकरोमि॥एवंसंप्रार्थ्यमनसाकुर्य्यात्पौर्वाह्निकींक्रियाम्॥दीक्षितस्वविधानेनतथाचब्रह्मचारिणाम्॥वाण
प्रस्थस्थितानाञ्चशौचादिद्विगुणाक्रिया॥संध्याशिवानांविशेषेणकृत्यंचतुर्गुणंभवेत्॥आचम्यविधिवन्मन्त्रीशुचौदेशेच

296

सन्निवेशत् ॥ तथाप्रातस्तनींसन्ध्यांकुर्याद्गुहानिशेवकः ॥ जलेसंयुज्यतीर्थानित्रिवारंमूलमंत्रतः ॥ क्षिप्त्वाभूमौकुशाग्रेणासप्त
धामूर्द्ध्निसेचयेत् ॥ वामेजलंसमाधायमंत्रयेद्दक्षिणेनतु ॥ पुनर्वामेनतत्क्षिप्त्वामूर्द्ध्निसिञ्चेद्द्विवारकम् ॥ गुरुणाचार्यदे
शेनमुद्रयादिव्यसंज्ञया ॥ इडयाकृष्यतत्तोयंक्षालितान्तर्मलंपुनः ॥ दक्षपार्श्वस्थितावज्रशिलायांप्रोक्षयेच्चतत् ॥ अस्त्रमं
त्रेणविधिवत्पुनराचमनंभवेत् ॥ अघमर्षमेनाद्भिःसर्वपापानिकृन्तनम् ॥ तोयाञ्जलिंपुनःक्षिप्त्वासूर्य्यमण्डलमध्यगाम् ॥
गायत्रींभावयेद्देवींसूर्य्यासनकृताश्रयाम् ॥ तडिद्यदादित्यसंकाशांप्रसन्नकाशकरांस्मरेत् ॥ कृष्णाजीनाम्बरांबालांध्यायेत्तारवि
तेश्वरे ॥ उत्थायंकृष्णगायत्रींतदभेदशतंजपेत् ॥ कृष्णायविद्महेइगुन्नायदामोदरायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् गा
यत्रेयप्रकीर्त्तिता ॥ तेनकृष्णायविद्महेदामोदरायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् ॥ सर्वदेवमयीसर्वपावनावरदायिनी
प्राणवायामुक्तिकरीश्रीबीजाद्याचभोगदा ॥ हृल्लेखाद्यामहासिद्धिकरीसर्ववशङ्करी ॥ वाग्वाद्याचरेद्वरूपाकाम्यपाजनर
ञ्जनी ॥ एवंतेकथितामंत्रसंध्यामंत्रफलाप्तये ॥ नकुर्याद्यदिमोहेननदीक्षाफलमाप्नुयात् ॥ संक्षेपसंध्यामथवाकुर्यान्मं

गौतमी· वीत्यशक्तितः॥ सायंप्रातश्च मध्याह्ने कृष्णं ध्यात्वा मनुं जपेत्॥ इति संध्यात्रयं प्रोक्तं कर्मणां सिद्धिदायकम्॥ गंधायां पतितायां
२० वा गायत्रीं दशधा जपेत्॥ यथाप्राणं यथाज्ञानं यथाकुर्यात्तदच्युत॥ यदुपक्रुतं मज्जनार्थं तत्र कुर्यात्तथा तथा॥ आदर्शोद
र्शनं कुर्यान्मृतस्पर्शे च कज्जलम्॥ मत्याख्ययो पराणार्थो यक्षे मयोगश्च चिन्तयेत्॥ स्नायाच्च कृष्णपूजार्थं न आदौ विमले जले॥
पूजा च पञ्चधा प्रोक्ता तासां भेदान् शृणुष्व मे॥ अतिगमनमुपादानं योगं स्वाध्याय एव च॥ इज्या पञ्चप्रकारार्चाक्रमेणाकथ
यामि ते॥ तत्राभिगमनं नाम देवतास्थानमार्जनम्॥ उपलेपनिर्माल्यदुरीकरणमेव च॥ उपादानं नाम गंधपुष्पादिचरन
तथा॥ इज्या नाम च स्वदेवपूजनं च यथार्थतः॥ स्वाध्यायो नाम कृष्णस्यो मन्त्रार्थपूर्वको जपः॥ सूक्तस्तोत्रादिपाठश्च हरिसंकी
197 र्तनं तथा॥ तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः॥ योगो नाम स्वदेवस्य स्वात्मन्येव विभावना॥ इति पञ्चप्रकाराच्चा तंत्र
कथिता तव सुव्रत॥ सामीप्यसारूप्यसायुज्यसालोक्यप्रदाः क्रमात्॥ प्रातःकाले वा मध्याह्ने स्नानार्थं तीर्थमाश्रयेत्॥ स्नानं तु २०
द्विविधं प्रोक्तं मन्त्रवारुणविभेदतः॥ अनन्तादित्यसंकाशं वासुदेवं चतुर्भुजम्॥ शंखचक्रगदापद्मं मुकुटं वनमालिनम्॥ तत्र

पादोदकजां धारांनि पतन्तीं स्वकां तनुम् ॥ तया संक्षालयेत् सर्वमनन्तं देहगतं मलम् ॥ नक्षणाद्विरजो मंत्री जायते स्फटिकोत्तमः ॥
इदं स्नानं वरं स्नानं तीर्थकोटिशताधिकम् ॥ योगिनां स्नानमेतद्धि कथितं परमाद्भुतम् ॥ वायुस्नानं तथा कुर्यात् यथाशास्त्रविधान
वित् ॥ मलप्रक्षालनं स्नानं रवशाखोक्तं समाचरन् ॥ मंत्रस्नानं ततः कुर्यात् कर्म्मणां सिद्धिहेतवे ॥ अस्त्रेणालोऽमुत्स्नानं वैत्रिभा
गं तान्नकारयेत् ॥ जले चैकं द्वादशयोनिः क्षिपेदस्त्रमुच्चरन् ॥ एकं मूर्द्धादिनायन्नं पठममूलं विलेपयेत् ॥ ड्रापंपादादिनायन्नं
नथैव प्रविलेपयेत् ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्म्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ आवाहयामि देवि
वित्वां स्नानार्थमिह सुन्दरि ॥ एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ एवमावाह्य विधिं मूलस्त्रेण मंत्रयेत् ॥ आमंत्र्य तामिसंयोज्य
सोमसूर्याग्निमण्डलं ॥ विचिन्त्य मज्जीतन्मध्ये निमज्जोन्मुलमुच्चरन् ॥ उत्थायाचमनं पश्चात् षडङ्गन्याससंयुतं ॥ आत्मानंद
शधादिभिम्मुद्रयाकालसारव्यया ॥ सम्प्रकृत्वाऽभिषिञ्चेत्वाय मुनामंत्रितज्जलैः ॥ वामऽसा कृत्वा मुष्टिं दक्षहस्तेन वेष्टयेत् ॥ कल
सारव्य भवेन्मुद्रा सर्वथा पहरा शुभा ॥ शालग्रामशिलातोयां तुलसीदलमिश्रितम् ॥ कृत्वा शंखभ्रामयन्त्रिनिः क्षिपेन्निजमूर्द्धनि ॥

नयोज ४

गौतमी· शालग्रामशिलातोयमपीत्वा यस्तु मस्तके॥ प्रक्षेपयं स ब्रह्महत्ते तु सहस्रानि गच्छते॥ विष्णुपादोदकात्पूर्वं विप्रपादोदकं पिबेत्॥
२१ विरुद्धमाचरन्मोहाद्दासहस्रं तु गच्छते॥ पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे॥ सागरे यानि तीर्थानि पदे विप्रस्य दक्षिणे॥ सम
गराणि तीर्थानि पदे विप्रस्य दक्षिणे इति वा पाठः॥ ततः संक्षेपतो देवान् मनुष्यांस्तर्पयेत्पितॄन्॥ पीडयित्वा स्वयं तोयं प्रक्षाल्याच
म्य वाग्यतः॥ धारयेद्द्वादशी पुण्ड्रं परिधानोत्तरीयके॥ अछिन्नेनसदशेन शुक्लेनाचामेत्पीठसंस्थिताः॥ ऊर्ध्वपुण्ड्रं चन्दनेन कृत्वा संध्यां
समाचरेत्॥ पूर्वं तु कथितां संध्यां ध्यायन्देवीं समाहितः॥ श्यामवर्णां चतुर्बाहुं शंखचक्रलसत्करान्॥ गदापद्मधरां देवीं सूर्यासन
कृताश्रयाम्॥ ध्यात्वा जलाञ्जलिं कृत्वा तर्पयेत्कृष्णमव्ययम्॥ गुरुपंक्तिं प्रणतः पश्चात्तर्पयेदिष्टदेवताम्॥ नारदं पर्वतं जिष्णुं निशठो
188 द्धवदारुकम्॥ विष्वक्सेनं च शैलेयं गुरुं श्च तर्पयेद्द्विजः॥ अष्टाविंशति संख्यां वा दशधा वा त्रिधापि वा॥ मूलमंत्रं समुच्चार्य श्रीक् तंत्र
ष्णं तर्पयाम्यहम्॥ नमोऽस्तोऽयं मन्त्रः प्रोक्तस्तर्पणे विधिवत्तरेः॥ क्लीं श्रीकृष्णं तर्पयामि नमः॥ सायाह्ने वरदां देवीं गायत्रीं संस्मरे २१
न्यतिः॥ शुक्लां शुक्लाम्बरधरां वृषासनकृताश्रयाम्॥ त्रिनेत्रां वरदां पाशं शूलं च नृकरोटिकाम्॥ सूर्यमण्डलमध्यस्थां ध्यायन्गा

यत्रिमभ्यसेत् ॥ ललाटे च गदा कार्य्या मूर्द्ध्नि चापं परं तथा ॥ नन्दकं चैव हृन्मध्ये शंखं चक्रं भुजद्वये ॥ शङ्खचक्राङ्कितो विप्रः श्मशाने
म्रियते यदि ॥ प्रयागे वा गतिः प्रोक्ता सा गतिस्तस्य गौतम ॥ पूजार्थं जलमादाय सूर्य्ये तीर्थानि योजयेत् ॥ ब्रह्मज्योतिर्मयं विष्णुं गायत्री
मनसा स्मरन् ॥ ज्ञात्वा कृत्वा जपेत्तानु धर्मकामार्थसिद्धये ॥ सर्वपापक्षयं यान्ति ज्ञानमुत्पद्यतेऽचिरात् ॥ मूलमंत्रं हृदि स्मृत्वा याय
द्वै योगमण्डपम् ॥ हस्तौ पादौ च प्रक्षाल्य आचम्य वाग्यतः सुधीः ॥ सूर्य्यपूजां ततः कुर्य्याद्विशवार्थे नदीक्षितः ॥ पुनर्हस्तौ च पादौ
च प्रक्षाल्य विधिना यतिः ॥ आचमनं ततः कुर्य्याद्विशपादेस्मवान्वये ॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ द्वाभ्यामोष्ठे
च संमृज्य द्वाभ्यां मृज्यान्मुखं ततः ॥ एकेन हस्तौ प्रक्षाल्य पादावपि तथैकतः ॥ संप्रोक्षैकेन मूर्द्धानं ततः संकर्षणादिभिः ॥ आस्यनासा
क्षिकर्णांश्च नाभिहृदयकं भुजौ ॥ एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥ केशवाद्याः प्रणोक्ता वक्षो संकर्षणादिकान् ॥ संक
र्षणो वासुदेव प्रद्युम्नश्चानिरुद्धकः ॥ पुरुषोत्तमाधोक्षजनृसिंहश्च तथाच्युतः ॥ जनार्द्दनोपेन्द्रहरिर्विष्णवे द्वादशान्विताः ॥
इति श्रीगौतमीयतंत्रे सर्वतमोत्तमे सप्तमोऽध्यायः ॥ ॥ अथ द्वादशशुद्धिर्वैष्णवानामिहोच्यते गृहोपसर्पणं चैव तथा

गौतमी. २२

नुगमनं हरेः ॥ भक्त्या प्रदक्षिणाञ्चैव पादयोः शोधनं पुनः ॥ पूजार्थं मन्त्रपुष्पाणां भक्तैर्यो तोलनं हरेः ॥ करयोः सर्वशुद्धीनामियं
शुद्धिर्विशिष्यते ॥ तन्नामकीर्त्तनञ्चैव गुणानामपि कीर्त्तनम् ॥ भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते ॥ तत्कथाश्रवणञ्चैव तत्
स्योत्सवनिरीक्षणम् ॥ श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते ॥ पादोदकस्य निर्माल्यमालानामपि धारणम् ॥ उच्यते शिरसः शु
द्धिः प्रणामस्य हरेः पुनः ॥ आघ्राणं गन्धपुष्पादेर्निर्माल्यस्य च गौतम ॥ विशुद्धिः स्यादनन्तस्य घ्राणस्यापि विधीयते ॥ पत्रपुष्पादि
कं यच्च कृष्णपादयुगार्पितम् ॥ तदेव पावनं लोके तद्धि सर्वं विशोधयेत् ॥ कृत्वा वन्दनं ततो ध्यायेत् पूर्वोक्तेनैव वर्त्मना ॥ तन्मध्ये स्व
गोभूमिश्च ध्यायन्नव गृहन्ततः ॥ पूर्वे द्वारं ततो गत्वा सामान्यार्घं विशोधयेत् ॥ अस्त्रेण शङ्खं प्रक्षाल्य हृन्मन्त्रेण पूरयेत् ॥ मन्त्रये
न्मूलेनैव सामान्यार्घमिदं स्मृतम् ॥ द्वार्यां बाल्यं ब्रजेत्तत्र सर्वविघ्नोपशान्तये ॥ नन्दः सुनन्दश्च प्रचण्डो बल एव च ॥ अबलो म तंत्र
दनामा च सुभद्रो विघ्नवैष्णवाः ॥ द्वौ द्वौ विष्णोः प्रतिद्वारे प्रवर्त्ताविनतासुतम् ॥ प्रणवादिनमोऽन्तेन तन्नाममन्त्रेण पूजयेत् ॥ ततो २२
ऽक्षतान्समादाय दकेनाराचमुद्रया ॥ प्रक्षिपेदस्त्रमन्त्रेण गृहान्तर्विघ्नशान्तये ॥ अपसर्पन्तु ते भूता ये भूता भूविसंस्थिताः ॥ ये भू

१८९

नाविघ्नकर्त्तारमेनं इष्टमनुशिदक्षया ॥ भूतसंघान् समुच्चार्य्य रक्षमाद्यपुरःसरन् ॥ आयोदि हर्गृहाभ्यन्तः प्रविशेन्नकन्धरः ॥ यजे
नत्रैव बुधानां वासुदेवो यथानये ॥ आस्तुरके संयतान्मानच संविशेद्विहितासने ॥ तथा मृदासने मंत्री प्रटांजिनकुशोत्तरे ॥ काष्ठास
ने भवेद्रोगी वंशे वंशक्षयो भवेत् ॥ शिलासने च वाग्रोधः पल्लवे मतिविभ्रमः ॥ धरण्यां दुःखसंभूति पीडनं राजते भवेत् ॥ विष्णुः
कालात्मकश्चान्मात ततः पूर्वमुखो भवेत् ॥ गंधपुष्पादि पात्राणि स्वदक्षे च निवेशयेत् ॥ दीपं वलिश्च नैवेद्यां सुन्दरं पुरतोन्यसेत्
सुवासितास्तु संपूर्णां वामे कुम्भं सुशोभनम् ॥ पृष्ठदेशे यात्रमेकं करक्षानाय संन्यसेत् ॥ पद्मासनं स्वस्तिकम्वा आचार्य्यो विधिना
विशेत् ॥ उरोरुपरि विन्यस्य सम्यक् पद्मतलेउभे ॥ पद्मासनमिदं प्रोक्तं योगिनो हृदयङ्गमम् ॥ जान्वोर्वोरन्तरे कृत्वा सम्यक् पादत
लेउभे ॥ ऋजुकायो विशेद्योगी स्वस्तिकानं प्रचक्ष्यते ॥ मङ्गलाङ्कुर मात्राणि च चतुर्दिक्षु निवेशयेत् ॥ आशीर्वादगिभिर्द्विजातीनां वै
स्नवं योगमारभेत् ॥ शिष्यश्च वृणुयाद्भक्त्या आचार्य्यं भक्तितत्परः ॥ वासोहलंकारभिर्वैर्दिव्यपाद्यादिवर्ज्जितः ॥ ऋत्विजं वृणुयात्त
द्दशपञ्चत्रयं तथा ॥ पुण्याहं वाचयित्वा च पञ्चघोषपुरःसरम् ॥ भूतशुद्धिं ततः कुर्य्यात्सर्वार्थे त्वविशुद्धये ॥ कृताञ्जलिपरो भू

गौतमी त्वावामे गुरुहत्त्रयययजेत् ॥ गुरुरूत्त्रयस्माद्दिश्च पश्चापरगुरुस्तथा ॥ दक्षपार्श्वे गणेशञ्च मूर्द्ध्नि देवं विभावयेत् ॥ ततो मण्डपमध्ये
२३ च स्थण्डिलं गोमयाम्बुना ॥ ऽत्र विकल्पयथा न्यायं तत्समधोनिधापयेत् ॥ सूत्रं प्राक्प्रत्यगग्रञ्च विप्राशीर्वाचनैः सह ॥ तुणेनोना
भ्रितो मत्स्यो मध्यात् पश्चप्रविन्यसेत् ॥ तन्मध्ये स्थितयाम्योदग्रग्रं सूत्रं निधापयेत् ॥ ततो मध्यान्न्यसेद्धस्तमानमात्रं दिशं प्रति
सत्रे भ्रमकरान्नस्यो न्यसेत्पानवाम्यतमः पूमान् ॥ सूत्राग्रमकरे भ्यश्च न्यसेत्कोणेषु मत्स्यकान् ॥ कोणमत्स्यस्थिताग्राणि दिक्षु
सूत्राणि पातयेत् ॥ ततो भवेच्चतुष्कोणं चतुरस्रं तु मण्डलम् ॥ तत्राग्निमारुतं सूत्रं निर्ऋते शान्तु पातयेत् ॥ प्रागयाम्यवरुणो
दीच्यसूत्राग्रमकरेषु च ॥ विहितागलमसूत्रं चतुष्कं प्रतिपातयेत् ॥ कृतहस्तं भवेद्युक्तं कोणकोष्ठेषु मत्स्यकाः ॥ एष प्राग्वरु
200 णायाम्योदीच्यानि च प्रपातयेत् ॥ षट्पंचाशान्यदानिस्युर्एषिकानि शतनयात् ॥ पदानदाथो विभजेन्यदानि क्रमशः सुधीः ॥ पदैः तंत्र
षोडशकैर्मध्ये पद्मं वृत्तत्रयं मितम् ॥ तैरैर्वचत्वारिंशन्नीमांशाः स्याद्वीथ्यशोभितम् ॥ सद्वादशैः शतपदैः शोभाख्याः स्युश्च भूप्यराः २३
चतुष्पदाश्च शोभाः स्युः षट्पदं कोणकं भवेत् ॥ वृत्तवीथ्या बारचयेन्मध्ये सूत्रचतुष्टयम् ॥ प्रागयाम्यवरुणोदीच्यं तन्त्रवेद्रा

शिमण्डलम् ॥ कर्णिकायाः केशराणां दलस्याद्धं दलस्य च ॥ दलाग्रवृत्तराशीनां वीथ्याः शोभोपशोभयोः ॥ वृत्तानि चतुरस्राणि
व्यक्तं स्यान्नातिकल्पयेत् ॥ भवेन्मण्डलमध्याङ्कः कर्णिका चतुरङ्गुलः ॥ घ्यङ्गुलाः केशरास्तेषु संध्यग्रं चतुरङ्गुलम् ॥ तथा दलानां
मानाद्धेन च घ्यङ्गुलकं भवेत् ॥ अन्तरालं पृथग्वृत्तं त्रयं घ्यङ्गुलमुच्यते ॥ ततश्च राशिचक्रस्यान्तस्तस्य वर्णविभूषितम् ॥ वामे मण्ड
लकं कुर्यात्पञ्चभिरष्टभिरेव वा ॥ द्वात्रिंशदङ्गुलं तेन तत्परत्वान्नावदिष्यते ॥ वृत्तं चक्रसुशस्ताके चतुरस्रन्तु तद्विदः ॥ यदि वा
वर्त्तुलं चैव वास्तु द्वादशराशयः ॥ तेषु पिपीलिकामध्यामातुलुङ्गनिभा अपि ॥ चक्राश्च चतुरस्रश्चैव त्रयं द्वादशराधयः ॥ भवेयुः
पङ्कजदलनिभा वा वाधितावुधैः ॥ तद्बहिर्लिखिवान् कुर्याच्चतुरः कल्पशाखिनः ॥ जलजैः स्थलजैश्चापि सुमनोभिः समन्वितान्
॥ हंससारस्वकारण्डशुकभ्रमरकोकिलैः ॥ मयूरचक्रवाकाद्यैरारूढविटपाननान् ॥ सर्वर्त्तुनिर्वृत्तिकरान् त्रिलोचनमनोह
रान् ॥ तद्बहिः पार्थिवं कुर्यान्मण्डलं कृत्स्नकोणकम् ॥ मण्डलानि च तत्त्वज्ञो राशयस्तान्येव कारयेत् ॥ नामाकल्पत्ररचयेत् प्रमाण
दम्यमण्डलम् ॥ आवाह्य देवता यस्य मर्चयंत्वन्यदेवताः ॥ उभाभ्यां लभते शापं मंत्रीन वलडुर्म्मीति ॥ वालान्मकस्य देवस्य राशि

व्याप्तिमजानता ॥ कृतं समसं सर्वं स्यादज्ञावज्ञानमानिना ॥ तस्मात्सर्वं प्रयत्नेन राशीन् साधयतीत् क्रमात् ॥ अवगम्यान्तुरू-
पाणि मण्डलानि न चान्यधीः ॥ उमेकमेदर्थ्वं यिन्दुहोतुं वा सर्वदेवताम् ॥ रजांसि पञ्च वर्णानि यं चन्द्रव्याप्तिकानि च ॥ पीतशुक्ला-
रुणाश्यामकृष्णान्येतानि भूतले ॥ हारिद्रं स्यात्तथा पीतं तण्डुलञ्च सितं भवेत् ॥ तथा दोषाय वक्षार संयुक्तं रक्तमुच्यते ॥ कृष्णं द-
ग्धपुलाकोत्थं श्यामं विल्वदलादिकम् ॥ मितेन रजसा कार्या सीमा रेखादि पश्चिना ॥ अङ्गुलीं सेधविस्तार प्रशस्ता सर्वकर्मसु
॥ पीता स्यात्कर्णिका शुक्ला पीतरक्ताश्च केशराः ॥ दलान्यच्छ स्यान्तरालं श्यामं चूर्णेन पूरयेत् ॥ सितरक्तासिते वर्णैर्वृत्तत्रयमुदी-
रितम् ॥ नानावर्णविचित्राः स्युश्चित्राकाराश्च वीथयः ॥ द्वारशोभोपशोभाः स्युः श्वेतरक्ता हरिद्रकाः ॥ राशिचक्रावशिष्टानि को-
णान्यदिक्षु यानि वै ॥ पीठपादानि तानि स्युरसितान्यरुणानि वा ॥ अथ पारुणानि च दलानि तथा दलसंधिरसितवत् ॥ असित-
ता वरुणाश्च रजसा विहिता न्यथि कथयत्स्वरवरे ॥ ॥ इति श्रीगौतमीय महातन्त्रे सर्वतत्त्वमोत्तमे अष्टमोऽध्यायः ॥ ॥ पञ्चग-
व्येन तजेहं मण्डलञ्च विशोधयेत् ॥ पलमात्रं दुग्धभागयो मूत्रं भागमिष्यते ॥ घृतं च पलमात्रं स्याद्गोमयं तोलकद्वयम् ॥ दधि

प्रसृतिमात्रंस्यात्पञ्चगव्यमिदंस्मृतम्॥अथवापञ्चगव्यानांसमानोभागइष्यते॥मूलमन्त्रेणसंमंत्र्यकुशाग्रेणैवशोधयेत्॥
तेनसर्वविशुद्धिंस्यात्सर्वपापनिकृन्तनम्॥महान्तिपातकान्येवकृत्वागव्यंपिबेत्यदि॥नाशयेत्पानमात्रेणसप्तुर्वेदवे
दितः॥भूतशुद्धिंततःकृत्वोड्डयेनपूर्णफलंलभेत्॥ॐनमःसुदर्शनायेत्युक्त्वास्त्रेणैवदेशिकः॥तालत्रयंसम्विदध्यादुर्ध्वो
र्ध्वंचसमाहितः॥दिग्बन्धनंछोटिकाभिर्दशभिःकारयेत्सुधीः॥ततस्तेनैवजनितंतेजोरक्षत्वितिस्मरेत्॥विनिधायकरौस्वाङ्के
उत्तानौपरिचिन्तयेत्॥हूंकारेणसमुत्थाप्यशक्तिस्वाध्वरसंस्थिताम्॥मूलाधारमथस्वाधिष्ठानञ्चमणिपूरकम्॥अनाहत
विशुद्धञ्चआज्ञाचक्राञ्चचिन्तयेत्॥गुदेचध्वजमूलेचनाभौहृदयएववच॥कण्ठेतथाभ्रुवोर्मध्येयथाक्रममनुस्मरेत्॥चिन्त
येत्सुनराधारंकनकाजंचतुर्द्दलम्॥तन्मध्येचिन्तयेद्योनिंचतुष्कोणिसमसद्युतिम्॥तदन्तश्चिन्तयेन्मन्त्रीजीवात्मानंसमाहितं
जवावन्धुकसदृशंतडित्कोटिसमप्रभम्॥सूर्य्यकोटिप्रतीकाशंचन्द्रकोटिसुशीतलम्॥प्रदीपकलिकाकारंकुण्डलिन्यासनं
तथा॥सुषुम्नावर्त्मनासोऽहमितिमन्त्रेणयोजयेत्॥सहस्रारेशिवस्यानेपरमात्मनिदेशिकः॥तथैवपञ्चभूतानिसंहारक्रमत

गौतमी
२५

202

तथा ॥ वाक्पाद्पाणिपायूपस्थवचनादानमेव च ॥ गतिर्विसर्गानन्दश्रोत्रत्वक्चक्षुरसनाघ्राणः ॥ नासा शब्दस्तथा स्पर्शो रू-
पं रसोऽपि गन्धकः ॥ तत्त्वान्येतानि पंचविंशत्स्वरूपेणाचयोजयेत् ॥ अहंकारं मनो बुद्धिं चित्तं तत्रैव योजयेत् ॥ जीवभावेन लीनानि
सर्वाणि परिचिन्तयेत् ॥ धूम्रवर्णं ततो वायुवीजं षड्बिन्दुलाञ्छितम् ॥ पूरयेदिडया वायुं सुधीः षोडशमात्रया ॥ मात्रया च चतुः-
षष्ट्या कुम्भयेत्सुषुम्नया ॥ द्वात्रिंशन्मात्रया मंत्री रेचयेत्पिङ्गलाध्वना ॥ पूरयेदनया चैव संचिन्त्य नीलमारुतम् ॥ रक्तवर्णं
वह्निवीजं त्रिकोणं स्वस्तिकान्वितम् ॥ तेन पूरकयोगेन मात्रया षोडशाख्यया ॥ चतुःषष्ट्या मात्रया च निर्दहेत्कुम्भकेन च ॥ वाम-
पार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्
॥ तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं ॥ खड्गचर्मधरं क्रूरं क्रुद्धं कुक्षौ विचिन्तयेत् तंत्र
मूलाधारोत्थतेनैव वह्निना निर्दहेच्च तम् ॥ एवं संदह्य पापं तं द्वात्रिंशन्मात्रया ततः ॥ भस्मना सहितं मंत्री रेचयेत्पिङ्गलाध्वना २५
वामनासापुटे चन्द्रवीजं कुन्देन्दुसुतसंप्रभम् ॥ भालेन्दुवीजं संयोज्य ततः षोडशमात्रया ॥ सुषुम्नया चतुःषष्टिमात्रया वीजमेत-

वम्॥ ध्यात्वामृतमयीं वृष्टिं पश्चाच्छङ्खयोल्लसितीम्॥ तया देहं विचिन्त्यैवं मनसापि कुलाध्वना॥ वाष्टिंस्य मात्रया मंत्री लं बीजेन
दृढं नयेत्॥ स्वस्थाने हंसमंत्रेणाथ मनसैनैव वर्त्मना॥ जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः॥ इति कृत्वा भूतशुद्धिं मातृका-
न्यासमाचरेत्॥ गौतम उवाच॥ भूतशुद्ध्या वद ब्रह्मन् कस्य शुद्धिः प्रजायते॥ नात्मनः सर्वशुद्धीनां कारणं संतु कथ्यते॥ नजी-
वस्य ब्रह्मणश्च स्यादैक्यं तस्य नित्यशः॥ न देहस्य तदारभ्यानित्यता नस्य कथ्यते॥ मनसो वापि बुद्धेश्च कस्य स्यात्तु करुवीक्षणम्॥ इत्या-
दिसंशयं छिन्धि त्वं हि ब्रह्मसमः स्मृतः॥ नारद उवाच॥ शरीराकारभूतानां भूतानां यद्विशोधनम्॥ अव्ययब्रह्मसंयोगाद् भूतशु-
द्धिरियं मता॥ अन्तःकरणमध्ये तु ज्योतिरात्मा प्रवर्त्तते॥ लिङ्गदेहं तु तं प्राहुर्योगिनस्तत्त्ववेदिनः॥ तस्य शोधनमात्रेण सर्वशुद्धिः
प्रजायते॥ तदेव विश्वजनककारणं जन्मकारणम्॥ तद्वियोगे भवेन्मृत्युर्नान्यथा जन्मकोटिभिः॥ इत्येतत्कथितं सर्वं पुरुषार्थस्य
निगमे॥ योगाद्यभ्यासयोगेन मंत्राभ्यासेन नाशयेत्॥ भूतशुद्धिं विधायेत्थं योगानंदे द्विजोत्तम॥ न्यासं देहस्य सन्नाहं विदधी-
तानुपूर्वकम्॥ भूतशुद्धिर्मातृका च केशवाद्या तथा च सा॥ तत्त्वन्यासं तथा कुर्यान्प्राणायामस्ततः परम्॥ नजीवस्य ब्रह्मणश्च स

हैकं तस्यानित्यशः ॥ न देहस्य तदारभ्य नित्यता तस्य कथ्यते ॥ मनसो वापि बुद्धेश्च कस्य स्यात्कुरु वीक्षणम् ॥ इत्यादि संशयं छिन्धि
त्वं हि ब्रह्मसमः स्मृतः ॥ नारद उवाच ॥ वर्णन्यासं तथा कृत्वा दशतत्त्वं तथाचरेत् ॥ विष्णुपञ्जरनामानामित्युक्तं क्रमसंग्रहः ॥ त
थापि स्थापनं कुर्याद्यथावदनुपूर्वशः ॥ स्ववामाग्रे चतुरस्रं मण्डलं परिचिन्तयेत् ॥ पुष्पैरभ्यर्च्य तं मंत्री तत्राधारं प्रतिष्ठयेत्
॥ मं वह्निमण्डलाय नमो मंत्रोऽयं तस्य चेर्यते ॥ वृत्ताकारेण तत्रैव वह्नेर्दशकला यजेत् ॥ वृत्ताकारेण तत्रैव कला द्वादश पूज
येत् ॥ कं भं तापिनी इत्युक्त्वा धं वं तापिनिका तथा ॥ गं यं उच्चार्य धारिणी धूम्रार्च्चः परिपूजयेत् ॥ घं पं मरीचिं संभर्च्य ङं नं ज
लिनिकां तथा ॥ चं धं रुचिं छं दं चैव सुषुम्नां पूजयेत्कुरु ॥ जं खं तु भोगदां मंत्री पूजयेत्कुसुमाक्षतैः ॥ झं तं विश्वां समभ्यर्च्य ञं नं
च बोधिनीं न्यसेत् ॥ टं ढं च धारिणीं तद्वत् ठं डं क्षमां च पूजयेत् ॥ नमोऽन्तेनैव मंत्रेण चतुर्थी प्रत्ययान्विता ॥ एवं शङ्खं समभ्य
र्च्य कलासौरैर्धनप्रदाः ॥ विलोममातृकाजप्तास्ते च मंत्रं तथा सुधीः ॥ यास्त्वमा तीर्थजेनैव पूरयेद्विमलेन च ॥ ॐकारेणैव मंत्रेण
चन्द्रं तत्र प्रपूजयेत् ॥ अमृता मानदा पूषा तुष्टिः पुष्टिः रतिर्धृतिः ॥ शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिवृद्धिदः ॥ पूर्णा पूर्णा

203

मृताचेति कलाः षोडशका सदा॥ षोडशस्वरयोगेन नमोऽस्तेन प्रपूजयेत्॥ तत्राक्षमालानि पूर्व्यापरिणु वोणि विनिक्षिपेत्॥ वामेना
छ्वाय हस्तेन षडङ्गं दक्षहस्तेन॥ दशकालोजपेन्मूलं गालिनी शिखयान्यसेत्॥ कारौ प्रसार्य्य चान्योऽन्यं सम्पुटक्रमयोगतः॥ प्र
योज्य दक्षिणाङ्गुष्ठं तथा वामपाणि दृया॥ वामया दक्षिणाङ्गुष्ठं मुद्रेयं गालिनी मता॥ अर्घस्य फलदा प्रोक्ता शङ्खस्योपरि चा
लिता॥ गंधादिभिः समभ्यर्च्य कृत्वा रक्षां वामयोजयेत्॥ अस्त्रादिभिः सुसंरक्ष्य धेनुं योगी प्रदर्शयेत्॥ न दक्षिणेन शंखं वा ता
म्रं वा पार्थिवं तथा॥ पात्रमेकं निधायाथ तथा तोयेन पूरयेत्॥ ताम्रपात्रं च विप्रर्षे विष्णोरतिप्रियं मतम्॥ तथैव सर्वपात्राणां
मूलं शंखं प्रकीर्तितम्॥ मृत्पात्रं च तथा प्रोक्तं स्वर्णं वा रजतं तथा॥ यच्चपात्रं हरेः शुद्धं नान्यतत्र नियोजयेत्॥ तेनामृतेन स
र्वेत्र द्रव्यं मंत्रमयं भवेत्॥ ततो धर्मादिभिर्मंत्रीगात्रे पीठानि विन्यसेत्॥ गंधाक्षतैः कुसुमकैः पवित्रैर्जलयोजितैः॥ इति पीठं
समभ्यर्च्य ध्यायेन्मंत्रात्मदेवताम्॥ मूलादि ब्रह्मरन्ध्रान्तं विषतन्तुस्वरूपिणीम्॥ कुण्डलीं त्रिविधां तत्र तथा बीजाक्षरं त्रिधा॥
तुरीयां कुण्डलीमूर्ध्नि वासुदेवं तृतीयकम्॥ ॐकारं मूलदेशे च द्रवत्स्वर्णनिभं स्मरेत्॥ मूलादि हृदयं यावत् वह्निकुण्डले

गौतमी
२७

नीतथा॥ हृदये कामबीजं च सूर्यायुतसमप्रभम्॥ सूर्यकुण्डलिनीं तत्र सूर्यकोटिसमप्रभाम्॥ हृदयाकुलपर्यन्तं ध्यायेद
नाकुलः सुधीः॥ क्रमध्यान्तु लरध्यान्तं मायाबिन्दुयुतप्रभाम् चन्द्रकुण्डलिनीं तत्र वै दमृतविग्रहाम्॥ बिन्दुनादमयं वा
सुदेवं विन्दो तृतीयकम्॥ देशकालाद्यवच्छिन्नं सदैतेजोमयं स्मरन्॥ तुर्यकुण्डलिनीं तत्र केवलं ज्ञानविग्रहाम्॥ एवं ध्या
त्वा पुनर्बीजं सम्पूर्णं मनसा स्मरेत्॥ चिदानन्दमयं स्वच्छं एकाचैकतया गुरुः॥ सुधावृष्यानिपतन्या नर्येयत्परदेवतम्॥
ध्यात्वा ध्यात्वा पुनर्ध्यात्वा सहजानन्दविग्रहः॥ बिन्दुस्रुतसुधाभिस्तु तर्पयेच्च पुनः पुनः॥ अन्तर्याग इति प्रोक्तो जीवन्मुक्ति
दायकः॥ मनीरागाश्च मुमुक्षूणामधिकारोऽत्र केवलम्॥ अथवा मानसे द्रव्यैः प्रकटे नापि पूजयेत्॥ ध्यात्वा हृत्पद्ममध्ये तु वा
सुदेवं यथोदितम्॥ स्वागताद्यैरुपचरेत् पाद्यार्घ्यैः स्नानमूषणैः॥ गन्धपुष्पधूपदीपैर्नैवेद्यविधिना विना॥ पुष्पाञ्जलीन्त
तो दद्यात् वहुमालां निवेदयेत्॥ अथवा घृतसम्पृतैः प्रकटैर् द्रव्यैः प्रभूम्॥ स्वागताद्यैर्निवेद्यान्तैरात्मभेदेन पूजयेत्॥ चन्दना
गुरुनिर्यासचर्चिताङ्गं स्वयं गुरुः॥ बिन्दुमञ्जरसं भेगानतास्थानविधानवित्॥ रचयेत्तिलकं भक्त्या प्रदीपकलिकानिभम्॥

204

तंत्र
२७

पुष्पाञ्जलिं पञ्चकृत्वो विधिवत्तत्तु याजकः ॥ जुलसीभुगलं वामपादे दक्षिणके तथा ॥ हयारि युगलं पार्श्वद्वये गन्धद्वयान्वित
म् ॥ पद्मयुग्मं मूर्द्ध्नि देशे मूलेन दक्षवामके ॥ षड्भिः सर्वत्तनोन्यसेत्पुनः सर्वैश्च सर्वतः ॥ एवं पुष्पाञ्जलिं प्रोक्तो हरिसान्निध्य
कारकः ॥ श्रीखण्डं दक्षिणे दद्यात्सितपुष्पेण संयुतं ॥ वामे च चन्दनं दद्यात्तथा रक्तेन संयुतम् ॥ सर्वं पुष्पांजलौ दद्यात्सर्वे
गन्धसमन्वितः ॥ दक्षिणां वासुदेवाख्यं स्वच्छं चैवमव्ययम् ॥ वामे च कर्णिकां नित्यां रक्तां रजोगुणान्विताः ॥ तेन सत्वर
जोरूपं आत्मानं चिन्तयेत्गुरुः ॥ मूलमंत्रं जपेत् ब्रह्मा सुषुम्नामूलदेशके ॥ मंत्रार्थं तस्य चैतन्य वीजं ध्यात्वा पुनः पुनः ॥ उद
यादिलयान्तञ्च मंत्रमेव समभ्यसेत् ॥ उदये शब्दरूपञ्च लयश्चात्मा प्रकीर्त्तितः ॥ ज्ञानाज्ञानविभागेन तन्मयो भवगो
तम ॥ मन संहरणं शौचं मौनं मंत्रार्थचिन्तनम् ॥ अव्यग्रत्वं मनिर्वेदो जपसम्पत्तिहेतवः ॥ एवं ते कथितं सम्यक्त्रिविधं य
जनं त्वमम् ॥ यान् ज्ञात्वा सम्प्रदायेन मंत्री वाञ्छितमश्नुते ॥ ॥ अथ मण्डलमध्ये तु पूजनं वाह्यगोचरम् ॥ आरभेत्पुवदै
द्रव्येर्नानारससुविस्तरैः ॥ पाद्यार्घ्याचमनीयानि पात्राणि च स्वदक्षिणे ॥ संस्थाप्य नत्तद्द्रव्यैश्च पूरितानि च देशिकः ॥ अर्घ

स्त्रीणां यावाणि यावद्स्यापित्रयं भवेत्॥ तथा चाचमनीयानि यावाणि च विभागशः॥ तथा कर्द्दो र्वेल्वादेकमेकं प्रशस्यते॥
पूर्येद्विधिना मंत्री मण्डलं शुभतण्डुलैः॥ शुद्धैर्वा शालैः सम्यक्कृत्वा पंकजमण्डलम्॥ कुशान्विस्तारयेत्तत्र वपद्मं विस्तरा
न्वितम्॥ पृथ्व्याणि च विकीर्य्याथ कुम्भस्थापनमाचरेत्॥ इमं कृयं ताम्रमयं मार्त्तिकं वा स्वशक्तितः॥ वित्तशाठ्यं न कुर्वीत कृते ति
ष्यमवाप्नुयात्॥ द्वात्रिंशदङ्गुलं कुम्भं विस्तारेणाभिशालिनं॥ षोडशद्वादशाङ्गुलमतो न्यूनं न कारयेत्॥ कुशपत्रीनिर्मितैः सूत्रैः
विधिवत्त्रिगुणीकृतैः॥ तेन संवेष्टयेत्परितः यथा न क्षरते क्वचित्॥ भस्मना मृत्सु साधकस्य क्षारेण चायपदं पदं॥ तस्माद्दोषापि विज्ञ
यकुर्य्यात्सर्वमतन्द्रितः॥ प्रक्षाल्यानारमं वेरेण गन्धैः परिमलान्वितम्॥ देवविनिर्मितैः सार्द्धं स्थापयेत्तान्सुमुच्चरन्॥ समीक्ष्य स्वत्व(
चान्तो येरथनाथ्येक्षवीरधी॥ विष्णुगन्धाष्टकेनाथ तीर्थोदेनाथ पूरयेत्॥ चन्दनागुरुह्रीवेरं कुष्ठकुंकुमरोचनाः॥ जटामांसी मुरा
मांसी विष्णोर्गन्धाष्टकं स्मृतं॥ गन्धाष्टकमिदं ह्युक्तं विष्णोः सान्निध्यकारकम्॥ वह्निरूपमयाधारं कलाभिः सह पूजयेत्॥ तथा सू
र्यमयं कुम्भं कलाभिः प्रपूजयेत्॥ जलं सोममयं तद्वत्कलाभिः समर्चयेत्॥ तेजत्रयमिदं प्रोक्तं जगदानन्ददायकं स्मृतं॥ विलोम

205

मातृकारूपे सर्वत्र पूरणं स्मृतं ॥ तथा मूलं समुच्चार्य्य पूरयेद्विगतामयं ॥ तीर्थमंत्रेण तीर्थानि योजयेत्सूर्य्यमण्डलात् ॥ वृहत्शं
खं तथा स्थाप्य स्वपुरोभागमग्रतः ॥ तत्राधारं प्रतिष्ठाप्य पूजयेद्वह्निमण्डलं ॥ ततः शङ्खं प्रतिष्ठाप्य सूर्य्यात्मकमथाचरेत् ॥ प्रद
क्षिणक्रमेणैव कलाः सर्वत्र पूजयेत् ॥ विलोममातृकां जप्त्वा तथा मंत्रजप्र पूरयेत् ॥ क्वाथोदकैर्व्वा दुग्धैर्वा पूर्वोक्तैर्वाप्रपूरयेत् ॥
तेजस्त्रयकलाऽभ्यर्च्य प्राणस्थापनपूर्वकं ॥ आवाहनादिकं कृत्वा कलाएकैकशः क्रमात् ॥ संपूज्याविद्धिवधिन्नामदेवसान्निध्यहे
तवे ॥ प्रणवांशोद्भवाः सम्यक्कलास्तत्र प्रपूजयेत् ॥ स्थापनान्ते तु संयोज्य गन्धपुष्पादिभिर्यजेत् ॥ एकैकमृक्पठंस्तत्र तत्र तत्र
जयां क्षिपेत् ॥ पाठस्ते जोमयं तत्र योजयेज्जुहुसत्तमः ॥ प्रथमं प्रकृतेर्हंसः प्रतद्विष्णुरनन्तरं ॥ त्र्यम्बकश्च तृतीयस्यात्तद्विप्रासोच
तुरीयकं ॥ विष्णुर्योनिं कल्पयतु पञ्चमं परिकीर्त्तितं ॥ ऋक्पञ्चकमिदं प्रोक्तं प्रणवार्णस्वरूपकं ॥ तारस्य पञ्चभेदेन पञ्चाशद्वर्ण
गाः कलाः ॥ सृष्टिर्ऋद्धिः स्मृतिर्मेधा कान्तिर्लक्ष्मीर्द्युतिः स्थिरा ॥ स्थितिः सिद्धिरिति प्रोक्ताः कचवर्गगताः क्रमात् ॥ अकाराद्ब्रह्मणोत्प(
त्रानन्नचामीकरप्रभाः ॥ एताः करधृताक्षस्रक्पद्मकञ्जयकुण्डिकाः ॥ जरा च पालिनी शान्तिरीश्वरी रतिकामिके ॥ वरदाह्लादिनी(

प्रीतिदीर्घाः सुश्वेतवर्णगाः ॥ उकाराण्विष्णुनाम्नाज्वालमालदलसन्निभाः ॥ अभीतिवदचक्रेष्वाहरः परिकीर्त्तिताः ॥ दीक्षायैद्रीभ
यान्विद्रानन्ताक्षुधोधनीक्रिया ॥ उत्वारीमृत्युरताः स्युः कथिताः यथवर्गकाः ॥ वज्रेणमागेदुत्पत्ताः शरच्चन्द्रनिभाप्रभाः ॥ उद्वहस्त
भयं शूलं कपालं बाहुभिर्वरं ॥ ईश्वरेणोदिताविन्दोः पीतश्वेतारुणासिताः ॥ अनाच यकवर्गस्याः सवाकुसुमसन्निभाः ॥ अभयं
हरिणं टङ्कं दधाना बाहुभिर्वरं ॥ निवृत्तिं संप्रतिष्ठा स्याद्विद्याशान्तिरनन्तरं ॥ इन्धिका दीपिका चैव रोचिका मोचिका परा ॥ सूक्ष्मा
सूक्ष्मामृताज्ञानामृता चाप्यायनी तथा ॥ व्यापिनी व्योमरूपाः स्युरनन्ताः स्वरशक्तयः ॥ सदाशिवेन संजाता नादादेताः सितद्विषः
॥ अक्षस्रक्शूलं गुणकपालवरतर्जनी ॥ नतत्कलाः समावाहकृत्वाप्राणास्य संयमं ॥ संपूज्यागन्धपुष्पाद्यैस्तस्मात्तेजलसमर्पये
त् ॥ कुर्वन्तेतजेस्त्वयकफलाअष्टाविंशज्जपन्नतः ॥ जयेत्कलानाश्चयच्चाशन्त्रणावंश्चसर्जुर्जवा ॥ उतश्चपञ्चम्भकजप्या मूलमंत्रं ज
पेत्ततः ॥ चतुर्नवतिमन्त्रोऽयं देवसान्निध्यकारकः ॥ नवरत्नं नदेदेवानिः क्षिपेन्मानुकांजपन् ॥ नवरत्नमयं चाप्यानन्नवरत्नदेने
स्मकं ॥ वज्रमौक्तिकमप्यारत्नंविद्रुमं पद्मरागकं ॥ नीलमरकतन्धेवमाणिक्यं स्वर्णरौप्यवचा ॥ नवरत्नमिति प्रोक्तं सर्वदेवाश्रमं मह

न् ॥ स्थापयेत्तन्मुखे मंत्री द्वक्षकं फलसंयुतं ॥ विस्तरं तन्मुखे दत्वा दत्वा च पञ्चपल्लवः ॥ शुद्धेन क्षौमयुग्मेन त्रिर्मिलेनांशुकेन वा
॥ वेष्टयेद्विधिना मंत्री सर्वाश्चर्यं यथा भवेत् ॥ बहुमाल्यैस्ततो दद्यात् गन्धञ्च सुमनोहरं ॥ हरिमावाहयेत्तत्र छायायां कल्प-
द्रुशाखिन ॥ ॥ इति गौतमीयमहातन्त्रे सर्वतोभद्रमंत्रे नवमोऽध्यायः ॥ ॥ अथ पुष्पाञ्जलिकरं समायतनभस्थलः ॥ हृदप
द्मसंस्थितं तेजः ॥ कुण्डल्या सह मेलयेत् ॥ चिदानन्दघनं शुद्धं सर्वतेजोमयं स्मरन् ॥ यट्चक्राभेदनेनैव उन्मन्या सह योज-
येत् ॥ जीवानन्दमयं तत्तु प्राप्तमैश्वर्यसम्भृतः ॥ आराध्यमानसे देवे वहन्नासापुटं क्रमात् ॥ करस्थमातृकाम्भोजे चैतन्यं यो-
जयेच्च तत् ॥ कुम्भमध्ये मंत्रमूर्तौ वा वाह्यपरि पूजयेत् ॥ कृष्ण कृष्ण महायोगिन् सर्वेन्तत्व हृदि स्थिते ॥ सर्वत्र सर्वग ब्रह्मन् कृप-
या सन्निधीभव ॥ मंत्रेणानेन संस्थाप्य तत्तन्मुद्रां प्रदर्शयेत् ॥ उद्धाञ्जलिमधः कुर्यादियमावाहनी भवेत् ॥ सेयमेव विपरीता
स्यात्मुद्रा स्थापनकर्मणि ॥ बाह्याङ्गुष्ठद्वयं मुष्टिमुद्रा स्यात्सन्निधापनी ॥ अङ्गुष्ठगर्भिणी सैव मुद्रा स्यात्सन्निरोधिनी ॥ अन्यो-
न्यतर्जनीयुग्मभ्रमणाद वगुण्ठनी ॥ आवाह्यपञ्चमुद्राभिः प्राणस्थापनमाचरेत् ॥ याशाङ्कुशपुटाशक्तिस्तनोऽहं स मंत्रं व-

गौतमी·
३०

देत्‌॥ कृत्वास्य प्राणानिह प्राणान्‌ कृत्वास्य जीव इह स्थितः॥ तस्य सर्वेन्द्रियाणि च वाङ्मनश्चक्षुरित्यर्थं॥ इहागत्य सुखं चिरं तिष्ठंतु
स्वाहेत्यायुतं॥ अयं प्राणान्‌ मन्त्रः प्रोक्तः सर्वजीवप्रदायकः॥ अनेन विहिता येस्मै न यो निर्जीविता मताः॥ रहस्यं चास्य गुरुतः स्वस्य
नोज्ञानवैभवे॥ किं न सिध्यति विप्रर्षे देशिकस्य न चान्यथा॥ मातृकाकेशवारव्यान्यन्तं मम स्ययेन वै॥ कराङ्गदशतत्वानि न सम्मा
सन्निधिर्भवेत्‌॥ सर्वात्मा सर्वगो देवो मण्डलाधारविष्ठितः॥ शालग्रामे मनोयन्ते मण्डले प्रतिमासु च॥ नित्यं पूजा हरेः कार्या
न तु केवलभूतले॥ गण्डक्यांश्चैकदेशे च शालग्रामस्थलं महत्‌॥ पाषाणान्तद्भवं यत्तत्‌ शालग्राममिति स्मृतं॥ शालग्रामशिला
स्पर्शात्‌ कोटिजन्माघनाशनं॥ किं पुनर्यजनं तत्र हरेः सान्निध्यकारकं॥ शालग्रामैकयजनाच्छतलिङ्गफलं लभेत्‌॥ बहुभिर्जन्म
भिः पुण्यैर्यदि कृष्णशिलां लभेत्‌॥ गोष्पदेन च चिह्नेन तेन संप्राप्यते जन्तुः॥ कामक्रोधादिदोषोत्थ सर्वदुःखनिवारणात्‌॥ य
त्रास्मित्वार्हरे तस्मिन्‌ देवः प्रीणाति पूजितः॥ पञ्चमहपलाशं च चतुरस्रं सुलक्षणं॥ चतुर्द्वारसमायुक्तं कामगर्वनिकारिणं॥ सा
मान्यमन्त्रमुद्दिष्टं समस्तादशाक्षरं शृणु॥ चतुरस्रं चतुर्द्वारं पञ्चमहद्दलान्वितं॥ षट्कोणमध्ये कामारव्यं समन्दशार्णवेष्टितं॥ य

तंत्र·
३०

डक्षरं मन्त्रु वरं वह्वोरणो विलिखेत्ततः ॥ एतद् मन्त्रं महाभाग कृपया कथितं तव ॥ अस्यविज्ञानमात्रेण कृत्स्नान्मासाधकोभ
वेत् ॥ अरवराड्मराड्कारं यान्नविघ्नाविजृम्भते ॥ सर्वदेवमयं येन तेन मराडलमुच्यते ॥ प्रतिमा कृत्स्नदेवस्य यत्नतः कारयेत्सु
धीः ॥ शिल्पिना कृत्स्नभक्तेन विश्वकर्मोत्तजानता ॥ दशपञ्चाङ्गुला मुख्या मध्यमा द्वादशाङ्गुला ॥ अष्टाङ्गुलाधमा सा तु न्यूनाधि
क्यं न कारयेत् ॥ अज्ञानेनापि मोहेन यदि कुर्यान्नराधमः ॥ प्रतिष्ठा विफला तस्य पूजनान्न फलं भवेत् ॥ मानाङ्गुलविहीना सा
प्रतिमा यत्र तिष्ठति ॥ राजानं पीडयत्ताव गृहस्थो नरकं व्रजेत् ॥ मानाङ्गुलेन सा कार्य्या नान्यथा मुनिसत्तम ॥ काश्मीरी ज्ञानदा
प्रोक्ता स्वर्णजापि च मुक्तिदा ॥ सस्यान्तिदा तु शैलजा राजती वहुमुक्तिदा ॥ तेजोजा दारुजा या च रत्निवीशत्रुनाशिनी ॥ ताम्रीधर्मवि
वृद्धिं च करोति वहुसौख्यदा ॥ मृदेव मृन्मयी प्रोक्ता प्रतिमा सुभलक्षणा ॥ भोगदा मोक्षदा सा तु प्रतिमा कथिता तव ॥ लेप्याले
ख्याद्विधा सापि प्रतिमा परिकीर्तिता ॥ पर्वताग्रे नदीतीरे चत्वरे गोष्ठभूमिषु ॥ समुद्रकूले चान्यत्र मानहीनान्त्रह्व पर्णां ॥ कृत्स्नप्र
तिकृतिं कुर्य्याद्दिव्यां वंशस्वचिन्हता ॥ तानसंख्यामयेन्मंत्री गृहे वा गोष्ठमध्यतः ॥ समाहितस्ततो मंत्री पूजयेदुपचारकैः ॥ षोड

गौतमी
३१

शोयचारमंत्रेणायमनारब्धेनसिद्धये ॥ यस्यदर्शनमिच्छंतिदेवाब्रह्मादयः ॥ कृपयादेवदेवेशमदग्रेसन्निधीभव ॥ उच्च
तेपरमेशानस्वागतंस्वागतंभवेत् ॥ कृतार्थोनुगृहीतोऽस्मिसफलंजीवितंतुमे ॥ यदागतोऽसिदेवेशचिदानन्दमयाव्यय
अज्ञानाद्वाप्रमादाद्वावैकल्यात्साधनस्यच ॥ यदपूर्णंभवेत्कृत्यंतथाप्यभिमुखोभव ॥ पाद्यंश्यामाकदूर्वाब्जविष्णुक्रान्ताभिरि
ष्यते ॥ यद्भक्तिलेशसम्पर्कात्परमानन्दसंप्लवः ॥ तस्यतेपरमेशानपाद्यंशुद्धायकल्पते ॥ जातीलवङ्गकक्कोलैर्देयादाचमनी
यकं ॥ स्वधामन्त्रेणमतिमान्स्मृत्वावैदक्षिणांकरं ॥ वेदानामपिवेदायदेवानांदेवतात्मने ॥ आचामंकल्पयामीशंशुद्धानांशुद्धि
हेतवे ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपान् ॥ दूर्वाभिर्देवशिरसिशिरोमंत्रेणचार्पयेत् ॥ ह्नदर्घ्यमिदंप्रोक्तंतुष्टयेशा
ङ्घ्रधन्वनः ॥ तापत्रयहरंदिव्यंपरमानन्दलक्षणं ॥ तापत्रयविमोक्षायतवार्घ्यंकल्पयाम्यहं ॥ घृतदधिमधुभिश्चमधुपर्कंस्व तंत्र
धाम्बुना ॥ सर्वकल्मषहीनायपरिपूर्णंस्वधात्मकं ॥ मधुपर्कमिमंदेवकल्पयामिप्रसीदमे ॥ मुखेचाचमनंदद्यात्केवलेनजले ३१
नच ॥ उच्छिष्टोऽप्यशुचिर्वापियस्यस्मरणमात्रतः ॥ शुद्धिमाप्नोतितस्मैतेपुनराचमनीयकं ॥ वन्द्यचन्दनकाश्मीरजलैःस्नान

विधीयते ॥ परमानन्दबोधाब्धिनिमग्नानिजमूर्त्तये ॥ साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीशते ॥ पीताम्बरद्युगं दद्याद्यथा
शक्त्या परिस्कृतं ॥ मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे ॥ निरावरणविज्ञानवासस्ते कल्पयाम्यहं ॥ उत्तरीयं ततो दद्याद्धेमो
र्ध्वं नियमान्वितं ॥ यमाश्रित्य महामाया जगत्सम्मोहनी सदा ॥ तस्मै ते परमेशाय कल्पयाम्युत्तरीयकं ॥ यज्ञसूत्रं ततो दद्याद
थवा स्वर्णनिर्म्मितं ॥ यस्य शक्तित्रयेणेदं संप्रोतमखिलं जगत् ॥ यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पयेत् ॥ हाराद्याभरणा
न्दद्यात्सुवर्णाश्मसमन्वितं ॥ स्वभावसुन्दराङ्गाय सत्यासत्याश्रयाय ते ॥ भूषणानि विचित्राणि कल्पयाम्यमरार्च्चित ॥ अर्घ्यो
क्षितजलं दद्यादुपचारान्तरान्तरे ॥ समस्तदेवदेवेश सर्वतृप्तिकरं परं ॥ अखण्डानन्दसंपूर्णं गृहाणं जलमुत्तमं ॥ चन्दना
गुरुकर्पूरमिश्रो गन्ध इहोच्यते ॥ सर्वाङ्गे लेपयेत्तेन नानापत्रयप्रशान्तये ॥ परमानन्दसौरभ्यपरिपूर्णदिगन्तरं ॥ गृहाण पर
मं गन्धं कृपया परमेश्वर ॥ पञ्च पुष्पाञ्जलीन्दद्यात्पूर्वोक्तेनैव वर्त्मना ॥ अन्यान्यपि च योग्यानि पुष्पाणि वैष्णवे मनो ॥ कम
लेकरवीरैश्च तुलस्या जातिकेतकी ॥ कह्लारचम्पकोत्पलकुन्दमन्दारनागकेशरयावन्ती ॥ नंद्यावर्त्तनु मल्लिकायूथीनवमालि

कासौगंधिकञ्चैवोरकं ॥ कोरण्डलोकमर्ज्जनविल्वार्ज्जुनमुनिपत्रकं ॥ पत्रंचामलकं शुद्धं कार्णिकारं तथा शुभं ॥ पलाशादि
यथालाभं गोविन्दाय समर्पयेत् ॥ मलिनं भूमिसंस्पृष्टं क्रिमिकेशादिदूषितं ॥ पर्युषितानि पुष्पाणि वर्ज्जयेद्देवतार्च्चने ॥ ति
ष्ठेद्दिनत्रयं शुद्धं पद्ममामलकं तथा ॥ तुलसी सर्वथा शुद्धा तथा विल्वदलानि च ॥ दिनैकं करवीराणि योग्यानि चतमोधन ॥
तुरीयगुणसम्पन्नं नानागुणमनोहरः ॥ आनन्दामोदरं भं पुष्पं गृह्यतामिदमुत्तमं ॥ मंत्रसंपुटीतान्यस्यमानान्पादं देववर्माणि ॥
ततन्यासं स्थले तां स्थान् गन्धपुष्पाक्षतैर्यजेत् ॥ पञ्चात्मिकायां दीक्षायां गणेशादिक्रमाद्यजेत् ॥ यदामध्ये तु गोविन्दं नै
ऋत्यां गणनायकं ॥ आग्नेय्यां हंसमभ्यर्च्य ऐशान्यां शिवमर्च्चयेत् ॥ वायव्यामर्च्चयेद्देवीं भोगमोक्षफलाप्तये ॥ गन्धादिभिर
थाभ्यर्च्य षडङ्गरूपावेनततः ॥ शक्तौ न तन्त्रं स्मिमदं मन्यथा केवलं यजेत् ॥ विंशत्कृत्वो जपेन्मंत्रं नमस्कृत्य समापयेत् ॥ ततोऽङ्गे
षडङ्गानि वक्ष्यमाणेन वा यजेत् ॥ आग्नेय्यां शिवकोणे च राक्षसे वायुकोणके ॥ मध्ये दिक्षु च पूर्वादि अङ्गषट्कं समर्च्चयेत् ॥ हा
रस्फाटिककालाञ्जनमुक्तावह्निरोचिर्यो लन्नना ॥ अभय वरो यतहस्तां प्रधानतोऽङ्गदेवताः कथिताः ॥ एवं समभ्यर्च्य मतिमान्

दहनन्ते दत्तो यजेत् ॥ सुदर्शनं देवेशं यन्त्रं यन्मूजयेत्तु समाहितः ॥ वेणवे नम इत्युक्त्वा मंत्रोऽयं समुदीरितः ॥ कौस्तुभं हृदये र
त्नं सूर्य्यायुतसमप्रभं ॥ कौस्तुभाय नमश्चेति तस्य मंत्र उदीरितः ॥ नद्यो वनमालाञ्च चन्द्रायुतसमप्रभां ॥ प्रणवं पूर्वमुच्चा
र्य्य वनमालायेति वदेत् ॥ वनमालामनुं प्रोक्तः सर्वपापौघनाशनं ॥ कौस्तुभोर्द्ध्वे च श्रीवत्सं चन्द्रायुतसमप्रभं ॥ श्रीवत्साय
नमश्चेति मनुस्तस्य महर्षिभिः ॥ महस्रसूर्य्यसङ्काशे कर्णे मकरकुण्डलं ॥ मकरकुण्डलाय नम इत्युक्त्वा मनुरीरितः ॥ किरीटं
मस्तके दीप्तं सूर्य्यायुतसमप्रभं ॥ सूर्य्यायुतसमाभासं किरीटाय नमो वदेत् ॥ प्रणवादिसमायं प्रोक्तः किरीटस्य महर्षिभिः ॥
पूर्वादि दिशमारभ्य प्रादक्षिण्यक्रमाद्यजेत् ॥ दामसुदामवसुदामकिंकिणीगन्धपुष्पकैः ॥ अन्तःकरणरूपान्ते कृष्ण
स्य परिकीर्त्तिताः ॥ आत्माभेदेन तु पूज्याय यथापूर्वं तथैव च ॥ प्रणवादि नमोऽन्ते स्वस्वमन्त्रैस्तान् परिपूजयेत् ॥ नवाङ्कमुक्तं
देवस्य भोगाङ्गं शृणु गौतम ॥ अंशेन महिष्यो देवस्य पुर आदि प्रपूजयेत् ॥ प्रदक्षिणक्रमेणैव रुक्मिण्याद्यास्तु ता मताः ॥ रु
क्मिणी सत्यभामा च लक्ष्मणा च सुलक्षणा ॥ कालिन्दी ऋक्षजा नग्नजिता स्याच्च सुनन्दका ॥ इत्येते सममवरया रुक्मिणी हृद

गौतमी यौवना॥ सितवस्त्रपरिधाना सर्वाभरणभूषिता॥ देवस्य वदनाम्भोजमालिनाशि मधुव्रताः॥ वराभयकरोयेना भक्तायप्र-
३२ क्षमेसतां॥ इयं लक्ष्मीः पराशक्तिर्विश्वानुग्रहरूपिणी॥ कलायकुसुमस्यामा सर्वाभरणभूषिता॥ पीताम्बरवृहच्छ्रोणी-
सत्यास्व्याधरणीः स्मृता॥ रत्नपूरकरा वामे दक्षिणे च वरप्रदा॥ अन्याश्च गौराः श्यामा भाक्रमेणापरिकीर्त्तिता॥ पीताम्बरप
रीधाना देवार्पितमनोमुदा॥ नन्दहि वसुदेवश्च यशोदा देवकी पुनः॥ वसुदेवो हेमगौरो वराभयकरस्थितः॥ देवकी श्याम
सुभगा सर्वाभरणशोभना॥ सितवस्त्रयुगाद्याश्च समर्पितफलप्रदा॥ यशोदा हेमसंकाशा सितवस्त्रयुगप्रदा॥ सर्वाभरणा
210 नन्दीप्ताकुण्डलोद्भासिताननः॥ रोहिणींश्च यजेत्तत्र नन्दगौरं समर्चयेत्॥ वरदाभयसंयुक्तं समस्तपुरुषार्थदं॥ वलदेवं-
तथा चैवं पूजयेत् कुन्दसन्निभं॥ हालालोलं कुण्डलिनं हेमवर्णां वमरे तथा॥ ततो यजेत्सुभद्रां च श्यामलां रूढयौवनां॥ नन्द तत्र
हि वृक्षयः सर्वे गोपगोपी समर्चयेत्॥ इन्द्रनीलमुकुन्दाद्यान् नन्दहिः परिपूजयेत्॥ इन्द्रनीलमुकुन्दश्च तथा चानन्दक- ३२
रूढयौ॥ प्रकारं शङ्खपद्मौ च निधयोऽष्टौ प्रकीर्त्तिताः॥ नन्दहिः कल्पवृक्षांश्च इन्द्रादीन् नन्दहि यजेत्॥ इन्द्रमैरावतारूढं श्याम

वज्रधरं तथा ॥ माधिपं सपरिवारञ्च तद्बहिः परिपूजयेत् ॥ अग्निं हेमसमाभासं शक्तितोमरधारिणं ॥ मेषारूढं शक्तियुक्तं तेजः
सांपतिमर्च्चयेत ॥ दक्षिणेपि तु देवञ्च माहिषोपरिसंस्थितं ॥ जैयं दण्डधरञ्चैव यमं पित्राधिदेवतं ॥ राक्षसाधिपतिं तद्वन्नै
र्ऋत्यां खड्गधारिणं ॥ तुरगावस्थितं देवं परिवारैः समर्च्चयेत् ॥ पाश्चात्ये वरुणं प्रुल्लं मकरारूढमुज्ज्वलं ॥ अपांपतिं पाशध
रं परिवारैः समर्च्चयेत् ॥ वायव्यां वायुदेवञ्च प्राणाधिपसमाह्वयं ॥ दक्षहस्ताङ्कुशमेनवाहनं परिपूजयेत् ॥ शरदिन्दुसमाभा
सं कृपयाशशलाञ्छनं ॥ सोमसोमादिशोऽधीशानवारूढं समर्च्चयेत् ॥ ईशानं वृषभारूढं चन्द्रायुतसमप्रभं ॥ रुद्राधिपं शूल
हस्तं गन्धपुष्पैः प्रपूजयेत् ॥ इन्द्रेशानमध्ये देशे ब्रह्माणं हंसवाहनं ॥ हेमगौरं चतुर्वक्त्रं यमहस्तं समर्च्चयेत् ॥ रक्षोवरुणा
योर्म्मध्ये विष्णुं चक्रधरं यजेत् ॥ नागाधिपं सुपर्णस्थं विष्णोः पारिषदान यजेत् ॥ वज्रादीनां प्रधानभ्रजान्तेत्यानञ्च बहिरर्च्च
येत् ॥ यथासिन्धुसमुद्भूतानन्तरङ्गाभिन्नतां ययुः ॥ तथा कृत्स्नसमुत्पन्ना एते तेन दायतां ययुः ॥ तज्ज्ञानेन च तद्ध्येयं साधकेन प्रयु
भंप्रुना ॥ एवं सन्नावृतिमयं देशिकः कृत्स्नमर्च्चयेत् ॥ धर्मार्थकाममोक्षाश्च करे तस्य सुनिश्चितं ॥ अथ वाङ्गदिकपतिभिः सद

स्त्रैरपिचार्च्चयेत्॥एवंवास्वर्च्चयन्कृत्स्नंकाममाप्नोतिःसभाजनं॥यद्येतद्यजनाशक्तंकृष्णाष्टकेनपूजयेत्॥श्रीकृष्णोवासुदे
वश्चनारायणस्समाहृय॥देवकीनन्दनःश्रेष्ठोवाच्ययदनन्तरं॥असुरान्तभारहारीधर्म्मसंस्थापकःस्मृतः॥अयंवापूज
यनकृत्स्नंयथावित्तानुसारतः॥इदंउत्तमाववान्भोगानस्तेतुहरितांव्रजेत्॥अगुरुशीरराडगरागलुसितान्यमधुचन्दने॥८
सारसौवीरनिक्षिप्तेनासाध्यामधुमर्पयेत्॥वनस्पतिरसोत्पन्नोगंधाढ्योगन्धउत्तमः॥आघ्रेयसर्वदेवानांधूपोऽयंप्रतिगृह्य
तां॥वर्त्याकर्पूरगर्भिण्यासर्पियातिलजेनवा॥संस्थापयेत्तुपात्रादौसुदीप्तशिखयाततः॥अर्घोदकेनसंस्कृत्यतन्दर्शयन्नि
वेदयेत्॥उत्तार्यहरिहम्मयोनंघ्राणंवामदिशिस्थितां॥वादयन्वामहस्तेनदक्षहस्तेनचार्पयेत्॥सुप्रकाशोमहातेजाःस
र्वतस्तिमिरापहः॥वाह्याभ्यन्तरंज्योतिर्दीपोऽयंप्रतिगृह्यतां॥स्वर्णेवाताम्रपात्रेवागौप्येवापद्मजेदले॥शितोपदंदशाल्यन्नं
सगुडंमधुनायुतं॥दधिदुग्धघृतोपेतंकदल्यादिफलान्वितं॥आनीयदेवपुरतःयंबीजेनविनिक्षिपेत्॥अस्त्रमंत्रेणविधि
वन्हेतुमुद्रांप्रदर्शयेत्॥चन्द्रबीजंवाम्बुसस्यंचतुर्द्देशस्वरान्वितं॥नादविन्दुसमायुक्तंबीजेनदमृतात्मकं॥प्लावयेत्तिचसंप्रोच्य

211

अनिरुद्धं वदेत्पुनः ॥ नैवेद्यञ्च तथेत्युक्त्वा कल्पयामि नमो वदेत् ॥ प्रोक्तो नैवेद्यमन्त्रोऽयं अनेन च निवेदयेत् ॥ अमृतोपस्तर
णमसि स्वाहेति जलमर्पयेत् ॥ आस्वाहास्योयप्राणायस्वाहेति प्रथमाहुति ॥ अङ्गुष्ठानामिकामध्यप्राणाख्या मुद्रिका मता
आहवनीयाय अपानाय स्वाहेति च द्वितीयिका ॥ कनिष्ठाङ्गुष्ठनामा च मुद्रा तत्परिकीर्त्तिता ॥ गार्हपत्याय व्यानाय स्वाहेति तृ
तीयाहुतिः ॥ तर्ज्जन्यङ्गुष्ठमध्याभिस्तन्मुद्रा परिकीर्त्तिता ॥ सत्याय च उदानाय स्वाहा या च चतुर्थिका ॥ मध्यमानामिकाङ्गुष्ठ चतु
र्थी च कनिष्ठिका ॥ आवसथ्याय समानाय स्वाहा च पञ्चमी तथा ॥ सर्वाभिरङ्गुलीभिस्तु तन्मुद्रा परिकीर्त्तिता ॥ प्रणवाद्यैरे
भिरेव देववक्त्रे हुनेत्सुरू ॥ ॐ निवेदयामि भवते गृहाणेदं हरिर्हरे ॥ निवेद्यार्पणमन्त्रोऽयं समर्थ्येसु प्रकीर्त्तितः ॥ क्षणं
विसृष्य मतिमान् दद्यात्करशुद्धकं ततः ॥ अमृतापस्तरणमसि स्वाहेति जलमर्पयेत् ॥ विष्वक्सेनाय वेदद्याद्धेयं नैवेद्य
मुत्तमं ॥ उद्धिष्टभोजिनो ह्येते एतद्यामवधारय ॥ शिवे च राऽस्वरायेति विष्वो विष्वक्सेनाय च ॥ शङ्खपद्मिष्टं शोधकायेद
प्रादत्त्वेनासिद्धये ॥ अन्यथा नैव सिद्धिः स्यादद्यैको नरकं व्रजेत् ॥ नैवेद्यजातमुद्धृत्य स्थानशुद्धिं विधाय च ॥ आचमनीयजलं द

आचमनशोधनमेव च ॥ हस्तलेपं ततो दत्वा पुनः पानीयमर्पयेत् ॥ सूक्ष्मवस्त्रद्वयं दत्वा दद्याच्च स्वर्णपादुके ॥ पूजास्थाने
समानीय बहुमालां तथार्पयेत् ॥ दिव्यगन्धं ततो दद्यात् ताम्बूलं शशिसंयुतं ॥ स्तोत्रैः स्तुत्वा च विविधैर्वत्स कृत्वा प्रदक्षिणां हरिं ॥ वे
दविज्ञो धनं दत्वा यत्फलं लभते नरः ॥ तत्फलं लभते भक्त्या कृत्वा कृष्णप्रदक्षिणां ॥ सप्तद्वीपां धरां दत्वा वेदविज्ञो महामुने
॥ तत्फलं लभते भक्त्या कृत्वा कृष्णप्रदक्षिणां ॥ पद्भ्यां कराभ्यां जानुभ्यां मूर्ध्ना शिरसा दृशा ॥ वचसा मनसा चेति प्रणामोऽष्टा
ङ्ग ईरितः ॥ भूमौ निपत्य यः कुर्यात् कृष्णेऽष्टाङ्गनतिं सुधीः ॥ सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात् ॥ नवीननीरदश्यामं नी
लेन्दीवरलोचनं ॥ वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणं ॥ मयूरबर्हदलोद्बद्धनीलकुञ्चितमूर्द्धजं ॥ कदम्बकुसुमोद्ब
द्धवनमालाविभूषितं ॥ गण्डमण्डलसंसर्गिचलत्काञ्चनकुण्डलं ॥ स्थूलमुक्ताफलोदारहारोद्योतितवक्षसं ॥ हेमाङ्गद
तुलाकोटिकिरीटोज्ज्वलविग्रहं ॥ मन्दमारुतसंक्षोभवल्गिताम्बरसञ्चयं ॥ रुचिरोष्ठपुटन्यस्तवंशीमधुरनिस्वनैः ॥ ल
क्ष्यगोपालिकाचेतो मोहयन्तं मुहुर्मुहुः ॥ वल्लवीवदनाम्भोजमधुपानमधुव्रतं ॥ क्षोभयन्तं मनस्तासां सस्मेरापाङ्गवीक्षणैः

212

यौवनाभिन्नदेहाभिः संसक्ताभिः परस्परं ॥ विचित्राम्बरभूषाभिर्गोपनारीभिरावृतं ॥ प्रभिन्नाञ्जनकालिन्दीजलकेलिकलोत्सुकं
॥ योधयन्तं क्वचिद्गोपान्व्याहृतान्तं गवां गणां ॥ कालिन्दीजलसंसर्गिशीतलानिलकम्पिते ॥ कदम्बपादपच्छाये स्थितं वृन्दावने
क्वचित् ॥ रत्नभूधरसंलग्नरत्नासनपरिग्रहं ॥ कल्पपादपमध्यस्थहेममण्डपिकागतं ॥ वसन्तकुसुमामोदसुरभिकृतदिङ्मुखे ॥
गोवर्द्धनगिरौ रम्ये स्थितं रासरसोत्सुकं ॥ सव्यहस्ततलन्यस्तगिरिवर्यातपत्रकं ॥ खण्डिताखण्डलोन्मुक्तमुक्तासारघनाघनं ॥
वेणुवाद्यमहोल्लासकृतहुंकारनिस्वनैः ॥ सवत्सैरुन्मुखैः शश्वद्गोपालैरभिवीक्षितं ॥ कृष्णमेवानुगायद्भिस्तच्चेष्टावशव-
र्त्तिभिः ॥ दण्डपाशोद्यतकरैर्गोपालैरुपशोभितं ॥ नारदाद्यैर्मुनिवरैर्वेदवेदाङ्गपारगैः ॥ प्रीतिसुस्निग्धया वाचा स्तूयमानपरात्
परः ॥ एवं विचिन्तयेद्देवं भक्त्या संस्तौति मानवः ॥ त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितं ॥ राजवल्लभतामेति भवेत्सर्वजनः
प्रियः ॥ अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवं ॥ अथ मुद्राप्रदर्शोथ अग्निसंस्कारमाचरेत् ॥ मोदनान्सर्वदेवानां द्रावणात्
पापसन्ततेः ॥ मुद्राख्याः कथिताः सद्भिर्देवसान्निध्यदायिकाः ॥ गौतम उवाच ॥ भगवन्मन्त्वया मुद्राः सूचिता न प्रकाशिताः ॥ कथं वि

गौतमी एवनंतासांकारुण्यात्कृहिमेरुदरो॥नारदउवाच॥कनिष्ठाङ्गुष्ठकौशक्तौकरयोरितरेतरं॥तर्ज्जनीमध्यमानामाः संहताभुग्नव
३६ र्जिताः॥मुद्रैषा गालिनी प्रोक्ता सस्तगोपालपूजने॥वनमालाभिनयवत्कराभ्यामागलादधः॥जानुपर्य्यन्तमित्येषा मुद्रास्याद्व
नमालिकाः॥बद्धवामकराङ्गुष्ठेनमस्तस्य कनिष्ठिका॥दक्षिणाङ्गुष्ठसंयुक्तानन्यानि चाप्रसारिता॥तर्ज्जनीमध्यमानामाः किंचि
त्संकोच्य चालिता॥वेणुमुद्रेह कथिता सुगुप्ता प्रेयसी हरेः॥अङ्गुली संहता कृत्वा करयोर्वामदक्षयोः॥वामनासासमायुक्ता दक्ष
पाणिकनिष्ठिका॥दक्षस्य मध्यमाभ्यान्तु वामहस्तस्य तर्ज्जनी॥वाममध्यमया क्रान्ता दक्षहस्तस्य तर्ज्जनी॥संपुटौ कारयेद्वि घा
नङ्गुष्ठावुभयोरपि॥श्रेष्ठमुद्रेति गदिता गोपिकासाधकोत्तमैः॥करौ संपुटितौ कृत्वा वामपाणिकनिष्ठिका॥निष्पीड्य दक्षपाणि
213 स्य दक्षिणाङ्गुलिभिर्दृढं॥तथा वामाङ्गुलिभिर्वै रति गाढं निपीडयेत्॥तृतीयं बिल्वमुद्रा स्यात्प्रशस्ता कृष्णपूजने॥कायेन मनसा तंत्र
वाचा बुध्या बुद्ध्या च यत्कृतं॥इह जन्मनि पूर्वस्मिन् अथवा पापसंचयं॥इमाः ज्ञानतयोजनन्तमुच्छन्त्यागुणसंशयः॥देवाः न ३६
वै नमस्यन्ति प्रणमानि तथा जनाः॥काम्यमुद्रार्थ्यविधिवन्निक्षिपेद्धृदयोपरि॥कृत्वेतरं करं वामे कृत्वा सम्यक् समाङ्गुलीः॥अ

न्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली: ॥ वामकनिष्ठया दक्षकनिष्ठाञ्च निपीडय ॥ वामानामिकया दक्षतर्ज्जनीञ्च निपीड
येत् ॥ वामाङ्गुलत्रयोपरि कुर्याद्दक्षिणाहस्तकं ॥ तथैव वामतर्ज्जन्या दक्षहस्ताङ्गुलीत्रयं ॥ एकत्र योजितं कृत्वा मुद्रास्यात्
कौस्तुभात्मिका ॥ दक्षिणामणिबन्धे च वामाङ्गुष्ठं नियोजयेत् ॥ मुद्रेयं कौस्तुभाख्याता दर्शनीया प्रयत्नतः ॥ कृत्वेतरेतरं करं वामे
कृत्वा सम्यक् समाङ्गुली: ॥ तर्ज्जन्युपरि वामस्य न्यसेत्करतलं ततः ॥ अङ्गुष्ठौ चालनीयौ च मत्स्यमुद्रेवमीरिता ॥ करौ संपुटि
तौ कृत्वा मणिबन्धे नियोजितौ ॥ अङ्गुष्ठे च कनिष्ठे च प्रविधाय सुयोजिते ॥ शेषा अङ्गुलयः सर्वा उभयोर्वामभङ्गुरः ॥ परस्पर
मसंलग्नाशून्यमध्ये च कारयेत् ॥ उक्ता कलशमुद्रेयं गोमाला चापि विधेः शुभा ॥ कृत्वेतरकरतले अन्तराञ्जलिसंपुते ॥ अन्यो
न्यमतिसंलग्ने अङ्गुष्ठान्तरमाहितौ ॥ कथिता कुम्भमुद्रेयं सर्वतन्त्रेषु गोपिता ॥ आकाश्चिनं ततः कृत्वा वामाङ्गुलिचतुष्टयं ॥ प्र
सार्य्य च तदङ्गुष्ठं दक्षहस्तेन वेष्टयेत् ॥ प्रसार्य तर्ज्जनीं दक्षां तदङ्गुष्ठं च मन्त्रवित् ॥ शङ्खमुद्रेयमुदिता दर्शनात्पापनाशिनी
॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतमोत्तमे दशमोऽध्यायः ॥ ॥ अथाग्निस्थापनं कुर्य्यादिह मन्त्रानुसारतः ॥ धर्मकौ

र्थमोक्षाणां यत्कृत्वा फलमश्नुते ॥ गोमायान्तः समालिख्य कुण्डं सर्वत्र मंत्रवित् ॥ सामान्यार्घ्यं प्रकल्प्याथ पञ्चगव्येन सेच-
येत् ॥ त्रिकोणं तद्बहिः षट्कोणञ्च पद्मं प्रकल्पयेत् ॥ चतुरस्रं चतुर्द्वारमेवं वा वह्निमण्डलं ॥ कुण्डस्यान्तरभागे च त्रिरेखां ह-
स्तमात्रकं ॥ दक्षिणोत्तरतस्तद्वत् कुर्याद्रेखात्रयं शुभं ॥ अभ्यक्षि प्रोक्ष्य सर्वं हि पञ्च शुद्धिं समाचरेत् ॥ वीक्षणं मूलमन्त्रेण
कवचेनाथ लेपयेत् ॥ अस्त्रेण रक्षितं कृत्वा वह्नेः संस्कारमाचरेत् ॥ पापाणाभवमग्निञ्च अथवा योनिसम्भवः ॥ श्रोत्रिया-
णां गृहाद्वापि वनस्थं चाथवाहरेत् ॥ यदृच्छालाभसंप्राप्तो योग्योऽयं होमकर्मणि ॥ निरग्निब्राह्मणाद्वह्निरर्थलाभकरो भ-
वेत् ॥ क्षत्रवैश्यश्च तुर्याश्च फलं दद्याद्धुताशनः ॥ वेश्यान्नशूद्राश्च विफलं जायते होमकर्मणि ॥ तस्मात्सर्वप्रयत्नेन वह्निमु-
त्तमं समाहरेत् ॥ आनीय कांस्यपात्रस्थं क्रव्यादांशं परित्यजेत् ॥ क्रव्यादेभ्यो नमस्कृत्य प्रणवाद्यो मनुर्भवेत् ॥ रेखाणामुदग-
ग्राणां ब्रह्मवैवस्वतन्दराः ॥ प्राणायामाञ्च रेखाणां मुकुन्दशङ्करान्दराः ॥ ततो वह्नेर्योगपीठमर्चयेत्कर्णिकोपरि ॥ धर्मज्ञान-
वैराग्यमैश्वर्य्यमादितो यजेत् ॥ पूर्वादिदिक्षु चापूर्वान् तथाधर्मादिकान् यजेत् ॥ मध्ये च पूजयेद्वह्नेर्नव शक्तीर्विधानवि-

214

त्॥ पीताश्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी॥ रुचिरा ज्वालिनी प्रोक्ता कृशानोर्नव शक्तयः॥ अमर्वे मण्डलं पूजांउंसो
म मण्डलं मंयजेत्॥ संवह्निमण्डलं तद्वदर्च्चयेज्जन्मवश्यके॥ वागीश्वरी मृतुस्नाता नीलेन्दीवरसन्निभा॥ वागीश्वरेण
सहितास्तुय चारैः प्रपूजयेत्॥ शक्तिप्रणवबीजाभ्यां तयोर्वचेनमीरितं॥ वागीश्वरीमृतुमतीं पुंरूपमधिष्ठितास्मरेत्॥ व
ह्निसंस्कृत्य पात्रस्थं बीजेनत्र मंत्रयेत्॥ चैतन्यं प्रणवेन वयोजयन् तं प्रपूजयेत्॥ आत्मनोऽभिमुखं वह्निं ज्ञात्वा पृष्ठम
हीतलः॥ शिवविजाधियादेव्यायोनौ वेनं विनिक्षिपेत्॥ ततो देवाय दद्याच्च दद्यादाचमनीयकं॥ गर्भनाड्याधृतं ध्यायेद
द्विरूपं परं गुरुः॥ पश्चाद्गर्भस्य रक्षार्थं प्रदद्याद्धर्मकंकणं॥ भूषाभिर्भूषयद्देवीं त्रैलोक्योत्पत्तिमातृकां॥ रेफवायुषड्
स्वरैश्च नादबिन्दुविभूषिता॥ मादियान्ताश्च जिह्वानां मानवः परिकीर्त्तिताः॥ पायौ लिङ्गे तथा नाभौ हृदये कण्ठमूलतः
लम्बिकायां भ्रुवोर्मध्ये जिह्वाज्वाला हवीन्यसेत्॥ हिरण्या कनकारक्ता कृष्णाख्या सुप्रभा मता॥ बहुरूपा निरक्ता च जि
ह्वा हृपीरयोनितः॥ सहस्रार्च्चिः स्वसितपूर्णाऽरिणतः प्रकृषस्तथा॥ धूम्रव्यापी सप्तजिह्वाश्चतुर्थेरश्चतिस्मृतः॥ षडङ्गमंत्रा

गौतमी
३८

वह्नेश्च प्रणवाद्या नमोऽन्तुकाः ॥ हृदयादिक्रमेणैव न्यनत्वां अङ्गदेवताः ॥ मूर्द्धि स्कन्धे तथा पार्श्वे कट्यां तु कटिपार्श्वके ॥ स्क-
न्धे मूर्द्ध्नि च विन्यस्य प्रादक्षिण्यपक्रमेण तु ॥ जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः ॥ अश्वोदरजसंज्ञोऽन्यः पुनर्वैश्वानराह्वय-
॥ कौमारतेजा विश्वामुखोऽन्ते देवमुखस्तथा ॥ एवं विन्यस्तदेहः सन् ज्वालयेन्मनुनामुना ॥ चित्पिङ्गल हन द्वयं दह द्वयं त-
था पच च ॥ सर्वज्ञाज्ञापय स्वाहा मन्त्रोऽयमनुदाहृतः ॥ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं ॥ सुवर्णवर्णममलं समृद्धं सर्व-
तोमुखं ॥ समिद्धेन च मन्त्रेण त्रिभिर्मन्त्रैर्हुताशनं ॥ ज्वालयेन्मतिमान्मन्त्री अन्यथा विफलं भवेत् ॥ दर्भैरगर्भैः शुद्धैश्च मूलम-
ध्याग्रछादितैः ॥ संस्तरेद्विधिवन्मन्त्री प्रदक्षिणावशादथ ॥ एवं संस्तरणं कुर्याद्वज्ञोयित्वात्मनोदिशां ॥ यज्ञवृक्षोद्भवैस्तद्वत्का-
ष्ठैश्च परिधित्रयं ॥ मध्यस्थमेखलायां तु संस्कारेण त्रिविक्रमः ॥ अथ चेत्स्थण्डिले मन्त्री भूमौ संवेपरिस्कारेत् ॥ गंधादिभिः सम-
भ्यर्च्य वह्निदेवं विभावयेत् ॥ त्रिनयनमरुणाभं बद्धमौलिं सुशुक्लांशुकमरुणमणिनाकल्पसंस्थं ॥ अभिमत-
वलशक्तिस्वस्तिकाभीतिमुञ्चैश्चरकनकसमालालंकृतांशकृशानुं ॥ सुवर्णवर्णममलं समस्त्वर्णोपरीतकं ॥ चतुर्भुजं द्वि-

तंत्र
३८

215

द्विशिरसंहव्यकव्याधिनाशिकं ॥ कमण्डलूनालवृन्तशक्तिस्वस्तिकधारिणां ॥ चक्षुःश्रोत्रंशकायमानसुत्तमं ॥ एवंवामनसा
ध्यायेच्छान्तिकार्येगुरूत्तमः ॥ सूक्ष्मःकाम्यगतैर्वर्णांध्यायस्वाद्गाकर्म्माणि ॥ मूर्तीरेषोसमभ्यर्च्चयेद्धोरोनुवडङ्गकं ॥ मध्ये
जिह्वांयजेद्वह्नेर्वह्नितन्मन्त्रनायजेत् ॥ वैश्वानरपदंपूर्वंजातवेदसनन्तरं ॥ लोहिताक्षानन्तश्चोक्ताइहावहततःपदं ॥ सर्व
कर्म्माणिदहिमेस्वाहामनुःसमुद्धृतः ॥ आज्यस्थालींसमानीयाक्षालयेदस्त्रमुच्चरन् ॥ कराङ्गुष्ठानामसमुत्तोल्यमेतन्न
त्रजंमंत्रतः ॥ तस्यामाज्यंविनिक्षिप्यजानीयात्तापनाहितं ॥ प्रज्वाल्यकुशगुच्छंतुआज्योपरिभ्रामनलेक्षिपेत् ॥ अभिद्योतनमित्यु
क्तंसर्वत्रसर्वकर्म्मसु ॥ पुनःकुशानमसमुज्वाल्यनिक्षिपेदाज्यमध्यतः ॥ मूलमंत्रेणामतिमानाज्यसंस्कारइरितः ॥ अभिमं
त्राचमूलेनरक्षयेदस्त्रमुच्चरन् ॥ पदर्शयेद्धेनुयोनीचआज्यंतदमृतात्मकं ॥ स्रुकस्रुवौचसमादायविधिनानिर्म्मितौ
गुरुः ॥ त्रिशःप्रतापयेद्वह्नौपुनःप्रक्षाल्यवारिणा ॥ पुनःप्रतप्यतौमंत्रीस्थापयेत्तौस्वदक्षिणे ॥ प्रादेशमात्रंमग्रथितदर्भेण
गंधपृनाक्षिपेत ॥ कृत्वाभागौगुल्मकस्यपक्षौस्मृत्वातुनाडिका ॥ वामदक्षमध्यभागेवीजाड्याःसंस्मरेत्ततः ॥ अग्रेवेणादक्षिणा

गौतमी
३९

216

भागादग्नये स्वाहयामुना ॥ जुहुयात् घृतमादाय वह्नेर्दक्षिणलोचने ॥ वामतस्तदादाय सोमाय स्वाहया ततः ॥ मंत्रेणा
नेन जुहुयादग्नेर्वामविलोचने ॥ मध्यात्तदस्य समादाय अग्नेर्भालस्थलोचने ॥ जुहुयादग्निसोमाभ्यां स्वाहेति मनुनामुना ॥ ह
न्मंत्रेणाश्रवेणाज्यभागादादाय दक्षिणात् ॥ जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मुखे ॥ इत्यग्नेर्नेत्रवक्त्राणां कुर्यादुद्घा
टनं गुरुः ॥ घृतव्याहृतिभिर्हुत्वा जिह्वाजे मूर्त्तिनाहुनेत् ॥ वैश्वानरेण मंत्रेण त्रिवारं जुहुयाद्गुरुः ॥ संस्कारार्थं ततो वह्ने
र्हुनेन्नवनवाहुतीः ॥ प्रणवाद्येन मतिमान् स्वाहान्तेन तदुच्चरन् ॥ गर्भाधानं पुंसवनं भीमन्तोन्नयनं तथा ॥ जातकर्म त
था नाम उपनिष्क्रमणं तथा ॥ चूडोपनयने भूयो वेदाध्ययनमेव च ॥ गोदानं च विवाहश्च संस्काराः शुभकर्मणि ॥ अ
शुभे मरणान्ताश्च प्रयुक्तास्तत्र वेदिभिः ॥ ततश्चापि ततो वह्नेः संपूज्य हृदयं नयेत् ॥ वह्निमंत्रेण विधिवद्दद्यादाहुतिपं
चकं ॥ समिधः पञ्च जुहुयाज्ज्वालाग्र घृतसंप्लुताः ॥ गुरुर्हृदयमंत्रेण विधिवत्स्वाहयाविना ॥ महागणेशमंत्रेणाहुनेद्दे
देकादशाहुतीः ॥ सामान्यं सर्वदेवानामेतदग्निमुखं स्मृतं ॥ बहुरूपायाश्च जिह्वायामावाह्य परमेश्वरं ॥ गन्धादिभिः स

तंत्र
३९

मभ्यर्च्च जुहुयात्षोडशाहुतीः ॥ मूलमंत्रेण विधिना वह्नेर्वीकरणादिकं ॥ पुनर्मूलेन वै जुहुयाद्दाहुतीः पञ्चविंशति ॥ नाडीस
न्धानमुद्दिष्टं वह्निदेवतयोरपि ॥ अङ्गादिपरिवाराणां मेकैकामाहुतिं हुनेत् ॥ पूर्णाहुतिमभिहुत्वा होमं कुर्याद्यथा
विधि ॥ तिलेनाज्येन जुहुयात्समिद्भ्यादि यथाविधि ॥ अत्र तिल हविर्द्रव्ये तिलाज्यं हविरुच्यते ॥ जुहुयाद्युक्तमन्त्रं वा मधु
त्रयसंयुतं ॥ पायसं मधुरोपेतं जुहुयाद्वा यथामतिः ॥ अवणान्नं जुहुयाद्वह्नेः यदि तु तः सर्वकर्मसु ॥ वधिरत्वं करोहोमे
नेत्रेन्धत्वमाप्नुयात् ॥ नासिकायाम तः पीडा शिरो होमाद्विमृत्युदः ॥ यतः कष्ठं ततः श्रोत्रं यतो धूमोऽथ नासिका ॥ य
तोऽल्पजलनं नेत्रं यतो भस्म ततः शिवः ॥ यतः प्रज्वलितो वह्निस्तत्र स्युः सर्वं जातवेदसः ॥ एवं होमं समाप्याथ मतिमान्
श्रमस्वेच्चरुं ॥ पात्रे ताम्रमये शुद्धे दुग्धे न कापिलेन वै ॥ शुद्धतण्डुलसंभूतप्रसृते विंशति क्षिपेत् ॥ घृतधारां ततो दद्याद्
यावत्स्विन्नो भवेच्चरुः ॥ अवतार्य ततो विद्वान् भागत्रयमथाचरेत् ॥ भागमेकं समादाय तेन होमं समाचरेत् ॥ कुण्डे वा
स्थण्डिले वापि स्थले वा शोधिते तथा ॥ एकहस्तमिते देशे कुशाच्छन्ने शुभे विते ॥ वह्निं तत्र समाधाय जातवेदो मनोऽज्जे

मनुजयेत् ॥ व्याहृतिभिस्ततो हुत्वा कृत्स्नमावाह्य भक्तितः ॥ गंधादिभिः समभ्यर्च्य मूलेन पंचविंशतिं ॥ आहुतीं जुहुयान्मंत्री
षडङ्गहोममाचरेत् ॥ ततोऽङ्गश्च ततो भूत्वा नमस्कृत्य च मंत्रवित् ॥ विसृजेद्धिनुगे धाम्निनित्यहोमोऽयमीरितः ॥ स्वगृह्योक्त
विधानेन बलिवैश्वमथाचरेत् ॥ भागद्वयमथ चरुं हुत्वा यद्विनिवेदयेत् ॥ एकभागं स्वयं भुक्त्वा शिष्टं शिष्येभ्य सम
र्पयेत् ॥ शयीत संयतः शिष्य कम्बले वा कुशान्तरे ॥ भूमिरस्थ मंत्रेणाऽऽलिखेद्वं वक्ष्ये कुरुः ततः शयीत तां रात्रिमधि
वासोऽयमीरितः ॥ ॥इति श्रीगौतमीयमहातंत्रे सर्वतंत्रोत्तमोत्तमे एकादशोऽध्यायः ॥ ॥ततः प्रातः समुत्थाय कृ
तनित्यक्रियो गुरुः ॥ कृतकृत्योऽपि शिष्यं तन्निवेदितः गुरुसन्निधौ ॥ कथयेद्रात्रिवृत्तान्तं शुभं वा यदि वाऽशुभं ॥ सुमङ्गली
भिर्नारीभिः सह संभाजनमित्थं ॥ गिरिशृङ्गारोहणाश्च हस्त्यश्वरथरोहणं ॥ आरोहणं सौधशिखरे देवो स्वनिरीक्षणं ॥ मङ्गल
द्रव्यमांसदर्शनं स्पर्शनं तथा ॥ मंत्रसिद्धसलिलाञ्जलि प्राशनानि न दृष्टवत ॥ अनाकुलानि कथयेच्छृणुयान्द्यानि सर्वतः ॥
कृष्णवर्णैर्भटैः स्वपिण्ड्याहारमेलनेयनं ॥ विप्राणां देववादेव नरस्त्रीणां निरीक्षणं ॥ सिद्धिवि प्राप्ति चोक्तानि अन्यानि निंदि

तानि च ॥ एवं दोषं समाज्ञाय क्षणात्परिहरेद्गुरुः ॥ होमं कुर्य्यात्ततः स्वादिद्रव्यैः कल्पोक्तदर्शितैः ॥ साङ्गं सपरिवारञ्च हुत्वा व
लिमथाचरेत् ॥ मण्डलस्य बलिर्भागैर्लोकेशादिर्बलिं हरेत् ॥ नक्षत्राणां सवाराणां सराशीनां यथाक्रमं ॥ गन्धाद्यैः सम्यगं
भ्यर्च्य तत्तन्मन्त्रैस्तु मन्त्रवित् ॥ शुद्धान्नेन ससतोयेन तत्तन्नाम्नानेस्वनुक्रमात् ॥ दद्याद्बलिं गन्धपुष्पधूपदीपकमादरात् ॥ नक्षत्रा
श्विन्यादीनां राशिः पादाधिकत्रयं ॥ शयादिस्तुन्नया नक्षत्रसंज्ञापूर्वमनन्तरं ॥ देवताभ्यः मदंप्रोक्तादिवा नक्तं वदेत्तथा ॥ च
रेभ्यश्चाथ सर्वेभ्यो भूतेभ्यश्च नमो वदेत् ॥ एवं राशौ तु संपूर्णे नामनिस्ता देवतायोजयेत् ॥ तथा राश्यधिपानां च ग्रहाणां त
त्रतत्र तु ॥ मीनमेषान्तरालेषु करणानां बलिं वदेत् ॥ मेषस्य वृश्चिकस्यारः शुक्रो वृषतुलाधिपः ॥ बुधो वै कन्यकानाथश्च
तुश्च कर्कटाधिपः ॥ सिंहराश्यधिपो भानुश्चापमीनाधिपो गुरुः ॥ मकरस्यापि कुम्भस्य मन्दो राश्यधिपा इमे ॥ लां इन्द्राये
भ्यादिविष्णुपारिषदमत्र्येन तथा ॥ दद्याद्बलिं दिगीशेभ्यो विधिनाथ गुरुर्नमः ॥ ॐ अश्विनीदेवताभ्यो दिवानक्तञ्चरीभ्यः
सर्वेभ्यो भूतेभ्यो नमः ॥ भरणीकृत्तिकापाददेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभ्यो भूतेभ्यो नमः ॥ कृत्तिकात्रिपादरोहिणीदेवता

भ्योदिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ रोहिणीमृगशीर्षपूर्वाषाढर्क्षे देवताभ्यो दिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः ॥
मृगशीर्षोत्तरार्द्धे देवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ आर्द्रापुनर्वसुत्रियादे देवताभ्यो दिवानक्तंचरीभ्यः स
र्वेभूतेभ्यो नमः ॥ पुनर्वसुपादपुष्यदेवताभ्यो दिवनक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ अश्लेषादेवताभ्यो दिवानक्तञ्चरी
भ्यः सर्वेभूतेभ्यो नमः ॥ मघादेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ पूर्वफाल्गुण्युत्तरफल्गुणीपाददेवताभ्यो
दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ उत्तराफाल्गुण्यांघ्रियादहस्तादेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ ह
स्ताचित्रार्द्धे देवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ हस्ताचित्रार्द्धे देवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥
चित्रोत्तरार्द्धे स्वातीदेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ स्वातिविशाखात्रियादे देवताभ्यो दिवानक्तञ्चरीभ्यः स
र्वेदेवताभ्यो नमः ॥ जेष्ठादिदेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ मूलादिदेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूते
भ्यो नमः ॥ पूर्वाषाढोत्तराषाढपाददेवताभ्यो दिवानक्तञ्चरीभ्यः सर्वेभूतेभ्यो नमः ॥ उत्तराषाढश्रवणादेवताभ्यो दिवानक्तञ्च

रीभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ श्रवणाधनिष्ठार्द्धदेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ धनिष्ठार्द्ध-
शतभिषग्देवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ शतभिषक्पूर्वभाद्रपदत्रिपाददेवताभ्योदिवानक्तञ्चरी-
भ्यः सर्वभूतेभ्यो नमः॥ पूर्वभाद्रपदोत्तरभाद्रपददेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ रेवतीदेवताभ्योदि-
वानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ मेषाश्विनीभरणीकृत्तिकापाददेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ वृषभ-
कृत्तिकात्रिपादरोहिणीमृगशिरःपूर्वार्द्धदेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ मिथुनमृगशिरार्द्रापुनर्वसु-
त्रिपाददेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ कर्कटपुनर्वस्वेकपादपुष्याश्लेषदेवताभ्योदिवानक्तञ्चरीभ्य-
ः सर्वभूतेभ्यो नमः॥ सिंहमघापूर्वोत्तरापाददेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ कन्योत्तरात्रिपादहस्तचित्रा-
र्द्धदेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ तुलाचित्रोत्तरार्द्धस्वातीविशाखात्रिपाददेवताभ्योदिवानक्तञ्चरी-
भ्यः सर्वभूतेभ्यो नमः॥ वृश्चिकाविशाखापादानुराधाज्येष्ठादेवताभ्योदिवानक्तञ्चरीभ्यः सर्वभूतेभ्यो नमः॥ धनुर्मूलपू-

वीषाढोत्तराषाढपाददेवताभ्योदिवानक्तञ्चरीभ्यः सर्वेभूतेभ्योनमः॥मकरोत्तराषाढत्रिपादश्रवणाधनिष्ठार्द्धदेवता
भ्योदिवानक्तञ्चरीभ्यो सर्वेभूतेभ्योनमः॥कुम्भधनिष्ठोत्तरार्द्धशतभिषकपूर्वभाद्रत्रिपाददेवताभ्योदिवानक्तञ्चरीभ्य
:सर्वभूतेभ्योनमः॥मीनपूर्वभाद्रपादउत्तरभाद्ररेवतीदेवताभ्योदिवानक्तञ्चरीभ्यःसर्वेभूतेभ्योनमः॥आवरणदेव
ताभ्योनमः॥शुक्रदेवताभ्योनमः॥बुधदेवताभ्योनमः॥चन्द्रदेवताभ्योनमः॥आदित्यदेवताभ्योनमः॥बृहस्पतिदेवता
भ्योनमः॥शनैश्चरदेवताभ्योनमः॥सिंहदेवताभ्योनमः॥व्याघ्रदेवताभ्योनमः॥वराहदेवताभ्योनमः॥खरदेवताभ्यो
नमः॥गजदेवताभ्योनमः॥वृषभदेवताभ्योनमः॥कुक्कुरदेवताभ्योनमः॥हरदेवतादुर्गागुहविष्णुलक्ष्मीर्धनाधिपाश्च
रदेवताइत्युक्तातेभ्योबलिंहरेत्क्रुद्धः॥इत्यंबलिविधिःप्रोक्तःसर्वविघ्नौघनाशनं॥गोपृच्छमधिकंन्यक्तान्वैरासरांभवे
त्॥जम्बीरंकपिलवृक्षश्चन्यक्ताचैवांसिकल्पयेत्॥शुक्लसिन्दुरबालार्कवर्णोबन्हेःसुशोभनः॥भेरीवादित्रगन्नीरशब्दोव
न्हेःशुभप्रदः॥चन्दुचन्दनकुन्दाभधुमःसर्वार्थसिद्धिदः॥खरबायससाबद्धंदोवन्हेःसर्वविनाशकृत्॥कृष्णःकृष्णगतेवर्णो

रज्यश्चापि विनाशयेत् ॥ पूर्णाहुतिं ततो दद्यात् मन्त्रिश्चैव विधानवित् ॥ ॐ भूव स्नये पृथिव्यै महते स्वाह याततः ॥ भूर्वो वाये
व चान्तरीक्षाय च महते च स्वाह याततः ॥ स्वश्चन्द्रमसे दिग्भ्यश्च नक्षत्रेभ्यः स्वाहा ॥ ॐ भूर्भुवस्स्वश्चन्द्रमसे नक्षत्रेभ्यश्च
दिग्भ्यश्च महते स्वाहा ॥ क्ष कक्ष वौ च सदा मोय हूतेनाप्युप्यतोऽप्यनः होमद्रव्याणि निक्षिप्य नाभौ सस्थाप्यतोऽप्यनः ॥ ब्रह्मार्प
णेन मण्डनाद्यात् पूर्णाहुतिं ततः ॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु च मनसा वाचा
कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ ब्रह्मार्पणमन्त्रः सोऽयं ब्रह्मार्प
णविधिः स्मृतः ॥ ॥ इति श्रीगौतमीय महातन्त्रे सर्वतन्त्रोत्तमोत्तमे द्वादशोऽध्यायः ॥ ॥ एवं होमविधिं कृत्वा कुण्डस्थ
ण्डलदेवताः ॥ दिक्पालदेवताश्चापि अङ्कुरार्पणदेवताः ॥ आनयेत्कलसे चापि कृत्वैकां भावयेद्गुरुः ॥ कृत्वाम्बधायुतं
नीत्वा शिष्यमाहूय तत्त्ववित् ॥ वाससा नेत्रे वध्नीयात् नेत्रमन्त्रेण यत्नतः ॥ पाययित्वा पञ्चगव्यं मन्त्रामृतमयं शुभं ॥ सप्तसौ
तं नेत्रमन्त्रेणाऽध्वषट्कं विशोधयेत् ॥ विद्यातत्त्वानि संशोध्य अभिषेकगृहं नयेत् ॥ वर्णाः कलापदं तत्त्वं मन्त्रो भुवनमेव च

गौतमी
४३

अध्वषट्कमिति प्रोक्तं मुनिभिस्तंत्रवेदिभिः ॥ वर्णाध्वा वर्णशस्त्रश्च फलाध्वा बहुभिरीरिता ॥ यादाध्वा पदसंमूहः स्यात्तत्वा
ध्वा पंचविंशति ॥ षट्त्रिंशद्देवं तत्वानि शति तत्वविदो विदुः ॥ मंत्राध्वा मंत्रराशिः स्यात्ते हि वैदिकतांत्रिकाः ॥ भुवनाध्वेति कथि
ता भुवनानि चतुर्दश ॥ शोधयाम्यमुमध्वानं ममुकस्याहि सर्वतः ॥ देवगर्भो नमश्चान्ते मनुरध्वविशोधने ॥ नवाहुतीर्गुरुः कु
र्यात्तत्रैकैकाध्वविशोधने ॥ हुत्वा गृहीत्वा तन्निशामभिषेकं गृहं नयेत् ॥ निवेश्य मातृकायंत्रे सेचयेत्कलसामृतैः ॥ कृत्वा तु
भवपूर्णात्मा आचार्यश्चानयेद्घटं ॥ गोरोचनायल्लवानि कल्पवृक्षाधिरामृपन् ॥ शिशोः शिरसि संयोज्य विलोममातृकां
जपन् ॥ मूलमंत्रं तथाजप्त्वा कुर्याद्देवाभिषेचनं ॥ कृत्स्नात्मकं तु ततो यंशिवं आदिपदावधि ॥ अभिषिञ्चेत्तेन मंत्री कृत्स्नात्मा
भवति ध्रुवं ॥ ततो यधिकलाभिश्च जलं कृत्स्नात्मकं भवेत् तेन तन्मेकमात्रेण शिशुः कृत्स्नो न चान्यथा ॥ एवं सकृत् कृते भक्त्याआ
त्मानं विश्वसंस्कृतं ॥ उद्भूतया यथाकामं देहान्ते तत्पदं व्रजेत् वस्त्रालेपिताकस्यादि जातीभिश्च संयुतः ॥ कृत्स्नात्मकं देशि
कं तं प्रणाम्य च पुनः पुनः ॥ निषीदितं सन्निधौ तत्स्वनियताद्विनयान्वितः न्यासजालं तत्स्वदेहे गुरुः सामस्त्ययत्नतः ॥ दक्षकर्णे वद

220

तंत्र
४३

मंत्रंत्रिवारं पूर्णमानसः ॥ गणेशादि मन्तुं चोक्ता समयान् कथयेद्गुरुः ॥ मंत्रार्थं मंत्रबीजञ्च नच्छक्तिं नत्कालापि च ॥ आत्मानं द-
र्शयेत्साक्षात्स्वनाम्नात्मयंततः ॥ मंत्रकुण्डलि देवानां मेकार्थत्वं प्रकाशयेत् ॥ सिद्धान्तवेदनं वं यत्नाद्बोधयेत्कृपया गुरुः ॥
॥ एकत्वा यदि शिष्यं तथा तन्मयतां व्रजेत् ॥ यथाग्रामशतं नो यदि विशदि मूत्रदूषितः ॥ गङ्गायां मिलितं तत्तु गङ्गेव भवति ध्रु-
वं ॥ यथा मातृमानसे पत्रयातीताभवेद्धिस्तुः ॥ विष्णोऽपि पूर्णतां ज्ञात्वा गुरुं यत्नेन तोषयेत् ॥ गुरवे दक्षिणां दद्याद्वित्ताढ्यं भ-
क्तितत्परः ॥ तदर्द्धं वा ततोऽर्द्धं वा यथाशक्त्याथ भक्तितः ॥ वित्तशाठ्यं न कुर्वीत कृते नार्थं समाहरेत् ॥ गोभूहिरण्यवस्त्रादीन्
गुरवेऽथ निवेदयेत् ॥ गुरुपुत्रेऽपि तत्पन्न्येतच्छिष्येऽपि स्वशक्तितः ॥ वस्त्रालङ्करणं दद्यात् भोज्यं मिष्टं यथारुचि ॥ ऋत्विग्-
भ्यो दक्षिणां दद्यात् वस्त्रालङ्कारेणभूषितं ॥ सान्त्वनां नयेयज्ञत्पा यथाविभवविस्तरात् ॥ ततः प्रभृति मंत्रज्ञो गुरुशासनसं-
स्थितः ॥ यथा मंत्रे तथा देवे यथा देवे तथा गुरौ ॥ पश्यद्भेदतो मंत्री एवं भक्तिक्रमास्तुने ॥ अभक्तिअनयद्धोके देवताक्लेशदाय-
कः ॥ त्रिदिनं निवसेन्नाम्ना सिद्ध्यै गुरुसन्निधौ ॥ अन्यथा न कृतं तेजो गुरुमेति न संशयः ॥ ॥ इति श्रीगौतमीयमहातन्त्रे

सर्व्वतन्त्रोत्तमोत्तमे त्रयोदशोऽध्यायः॥ ॥चैत्रे मास्यथ वा कृत्वा शुभक्षे गुरुशासनात्॥ द्वादश्यां शुक्लपक्षे च माधवे मासि
नन्तिथौ॥ आरभेदमलाया वै पुरश्चर्य्यां सुसिद्धये॥ जपहोमौ तर्पणञ्च सेको ब्राह्मणभोजनं॥ पञ्चाङ्गोपासनं लोके पुर
श्चरणमुच्यते॥ आदौ पूर्व्वक्रियां कृत्वा कुर्य्याद्भूमेः परिग्रहं॥ स्वेच्छाचारविहाराय ततः ऊर्द्ध्वं न लंघयेत्॥ जीवहीनो यथा
देही सर्व्वकर्म्मसु नक्षमः॥ पुरश्चरणहीनोऽपि तथा मन्त्रः न फलप्रदः॥ पर्व्वताग्रे नदीतीरे गोष्ठे देवालये तथा॥ पुरापारण्ये स
हातीरे समुद्रस्य निजे गृहे॥ तुलसीकानने रम्ये बिल्वमूले च शस्यते॥ विष्णुक्षेत्रे च विधिवत्सिद्धये जपमारभेत्॥ पुरश्च
रणकृन्मन्त्री भक्ष्याभक्ष्यं विचारयेत्॥ अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते॥ सत्कुलस्यान्नजातानि शुचीनां श्रीम
तां मतां॥ गृहस्थानां वदान्यानां भिक्षाशिनोऽग्रजन्मनां॥ अन्नानि वा हविष्यान्नं शाकञ्च विहितं तथा॥ फलं क्रमुकं केन्तुनां वर्ज्जे तंत्र
यन्नविहितं मुने॥ पयो दधि फलं वापि नारिकेलं यथोदितं॥ हविष्यं वा तथा श्रीयातश्शाकं यव समुद्भवं॥ रम्भाफलं तिन्तिडी ४४
कं कमला नागरङ्गकं॥ फलान्येतानि भोज्यानि एवमन्यानि वर्ज्जयेत्॥ ऐक्षवं वर्ज्जयेन्मन्त्री शाकेरैक्षव वर्ज्जितं॥ लवणं क्षारम

221

न्नञ्च गृञ्जनं कांस्यमवच ॥ ताम्बुलञ्च विभक्तान्नं दुःसभाषं प्रयत्नतः ॥ श्रुतिस्मृतिविरोधञ्च जपं रात्रौ च वर्ज्जयेत् ॥ सूर्यस्प
कुसुमचारित्वं मौनञ्चाध्ययनस्मृतं ॥ नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्मविवर्ज्जितं ॥ नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनं ॥
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥ जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धिदाः ॥ नित्यं सूर्य्यमुपस्थाय तस्यचाभिमुखो
भवेत् ॥ देवताप्रतिमादौ च वक्रो चाम्पर्च्चं तन्मुखः ॥ अनिर्द्दिष्टे तथा वक्त्रः शास्त्रोक्ताचारपालकः ॥ स्नानपूजाजपध्यानहोम
तर्पणतत्परः ॥ निष्कामो देवतायाञ्च सर्वकर्म्मनिवेदकः ॥ एवमादीश्च नियमान्पुरश्चरणमुच्यते ॥ शक्तौ त्रिसवनं स्ना
नं अन्यथा द्विःसकृत्तथा ॥ अस्नानस्य फलं नास्ति नचातर्पयतः पितॄन् ॥ अमेध्यसन्तरं देहं जलादिस्त्रियशुद्धता ॥ तस्मात्स्
र्वं जलस्नानं सर्वेषां मुनिभिस्मृतं ॥ नवीक्षोत्पातितं वान्यं यिराज्ञनं वेदमिन्दकं ॥ तथानाश्रमिणां विप्रं विष्णुत्वस्य विनिन्दकं
ऋतुकालं विना मन्त्री स्वस्त्रीयं नापि संस्पृशेत् ॥ मैथुनं तत्कथालापं तज्ज्ञोष्ठिपरिवर्ज्जयेत् ॥ सर्वेत्तेसिन्धुतीरे वापुण्यपार
द्वीपनदीतटे ॥ यदिकुर्य्यात्पुरश्चर्य्यां तत्कर्म्मं नाचिन्तयेत् ॥ ग्रामे वा यदि वावास्तौ गृहे वा तन्नचाचिन्तयेत् ॥ दीपस्थानं तथा चोक्तं

गौतमी ४५

मुखं पृष्ठञ्च मंत्रिणः ॥ दीपस्थाने भवेत्तन्नाथावाटिज्ञापनैः ॥ पूर्वोक्तस्य विभागेन चतुःसूत्रं निपातयेत् ॥ नवकोष्ठं भवेद्दे
तन्कूर्म्मदेहमनुत्तमं ॥ पूर्वादिदिशि मंत्रज्ञः प्रदक्षिणक्रमेण तु ॥ वादिवर्गान् लिखेद्विद्वान् पञ्च पञ्च विभागशः ॥ यादि
वर्गं शादिवर्गं लक्षमीशेच संलिखेत् ॥ कूर्म्मस्याङ्गञ्च कुर्य्याच्छोभां यथा भवेत् ॥ स्वराणां युग्मयुग्मञ्च मध्ये चाष्टसु दि-
क्षु च ॥ एवं नवाङ्गवानं कूर्म्मः सर्व्वेषां सिद्धिदीपकः ॥ दीपनारवं लिखेन्मध्ये पूजयेत्तं विभावयन् ॥ यस्यां दिशि यन्तेदग्रा-
माद्यक्षरं दृश्यते तथा ॥ कूर्म्मकाव्चिज्ञानीयान्तत्र सिद्धिर्न्न उत्तमा ॥ वक्त्र पार्श्वे च कोष्ठे च कैर्केकर्म्मस्या विधिर्हि ॥ मध्यकुक्षाउ
भेज्ञेयो पादेद्वीशे च पृष्ठकं ॥ एवं कूर्म्मोदिजानीयाद्दीपचक्रादिवेचकः ॥ मुखे सिद्धिर्भवेन्नूनं मध्ये पुष्टिश्च जायते ॥ उदा-
सीनः करस्थश्च कुक्षिस्थो दुःखमाप्नुयात् ॥ पादस्थं पीड्यते यत्नी बन्धनोच्चाटनादिभिः ॥ पृष्ठे मृत्युर्भवेच्च न मेवं कूर्म्मस्य संस्थि- तंत्र
तिः ॥ मंत्राक्षरेण मंत्रश्चेत् कूर्म्मनामो भवेद्यदि ॥ साधकस्य च नाम्नाथ किं न सिद्ध्यति मंत्रिणः ॥ पञ्चाशद्वर्णरूपेण क्षेत्रे शावि- ४५
श्वादिग्रहाः ॥ तस्माच्च मण्डलं क्षेत्रं सिद्ध्येत्सान्यथा ॥ द्विगुणाञ्चाप्यसुखस्थः पिठोष्ठेन सिद्धिमाप्नुयात् ॥ तस्माच्चक्रं विचार्ये

222

वंमित्रंचेन्सर्वसिद्धिदं ॥ यस्मिन्देशेदीपयतिः स्मृगुणंनाममंत्रयो ॥ तत्रयत्नेनगन्तव्यंसपीठादुलभोमतः ॥ रुद्राक्षैरपिभ
द्राक्षैः पुत्रजीवकुचन्दनैः ॥ स्फटीकैश्चप्रवालैश्चकुशग्रन्थिभवैस्तथा ॥ तथामलकसन्तूतैस्तूलसीकाष्ठनिर्मितैः ॥ एभिः
श्चमालिकांकुर्य्यान्मतिमान्वैस्मवेसमनो ॥ रुद्राक्षास्तवायात्तुअनन्तफलदामता ॥ पुण्डरीकभवामालागोपालमन्त्रसिद्धि
दा ॥ जीवपुत्रभवायात्तुपुत्रावितनुतेचिरात् ॥ कुचन्दनभवामालाराज्यभोगापवर्गदा ॥ प्रवालानिर्म्मितायात्तुसर्वसत्त्वव
शङ्करी ॥ कुशग्रन्थिभवामालाधर्म्मवृद्धिकरीमता ॥ तुलसीसन्तवायात्तुमोक्षवितनुतेऽचिरात् ॥ अष्टोत्तरशतैर्म्मालानिर्मि
तायात्तुमालिका ॥ राज्यंवितनुतेनृणांदेहान्तेमोक्षदायिनी ॥ मोक्षार्थीपंचविंशत्यापुत्रार्थीत्रिंशताजयेत् ॥ चत्वारिंशमंशोणि
भवाअतिचारायकेवलं ॥ पञ्चाशन्मणिभिर्मालासर्वकर्म्मप्रसाधिका ॥ अकारादिक्षकारान्ताचाक्षमालाप्रकीर्तिता ॥ क्षानं
मेरुमुखंतत्रकल्पयेन्मुनिसत्तम ॥ अनयासर्वमंत्राणांजपःसर्वसमृद्धिदः ॥ नित्यंजपंकरेकुर्य्यान्नतुकाम्यमवोधनात् ॥ ९
आरभ्यानामिकामूलात्परिवर्त्तनवैक्रमात् ॥ तर्ज्जनीमध्यपर्यन्तंजपेदष्टसुपर्वसु ॥ गोपालतंत्रमंत्राणांकरमालेयमीरिता

गौतमी· ४६

कार्पाससमत्तवं सूत्रं प्रवापरत्वाभिविनिर्म्मितः ॥ अथवा· पट्टसूत्रेण स्वर्णसूत्रेण वा तथा ॥ अणिमादिकमोक्षान्ताः सिद्धयेस्व

र्णसूत्रके ॥ पट्टसूत्रं वंशकरं धनपुत्रविवर्द्धनं ॥ कार्पाससम्भवं सूत्रं धर्मकामार्थमोक्षदं ॥ त्रिगुणां त्रिगुणी कृत्य अथये

ह्निल्यशास्त्रतः ॥ एकैकमुखं तु संयोज्य पुच्छं पुच्छे वियोजयेत् ॥ गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभाः ॥ एवं निर्माय

मालां वैशोधयेत्सुनिसत्तम ॥ अश्वत्थपत्रनवकैः पद्माकारं तु कल्पयेत् ॥ तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन् ॥ नि

त्यवैमित्तिकं कृत्वा समान्यार्घं विधाय च ॥ क्षालयेद्दीशसुतैर्जलैर्ल्लिख्य नत्पुरुषेन तु ॥ गन्धैरन्नलेम्मंनिमान् अघोरेण तु धूप

येत् ॥ अघोरेणैव सूक्तेन शतान्तुमन्त्रयेत् ॥ वामदेवेन सूक्तेन शमीकुर्याद्विचक्षणः ॥ एकैकमालामादाय ब्रह्मग्रन्थि

प्रकल्पयेत् ॥ एकैकमातृकावर्णान्ग्रथनादौ तु संजपेत् ॥ नासजातीयमेकाक्षमेवस्त्राविः प्रकल्पयेत् ॥ एवं संग्रथितां मालां तंत्र

223 पुनः पञ्चोपरिन्यसेत् ॥ तत्रावाह्य यजेद्देवं यथाविभवविस्तरैः ॥ मंत्रयेन्मूलमंत्रेण क्रमेणोत्क्रमयोगतः ॥ तथैव मातृकाव ४६

र्णैर्मंत्रयेमंत्रतत्त्ववित् ॥ क्षालयेन्पञ्चगव्येन पुनरीशेनसूक्ततः ॥ पुनर्विलप्य गव्येन जपेन्मंत्रं च पट्टच्छया ॥ नान्यमंत्रं जपेन्मं

त्रं कल्पयेन्नाविधुनयेत् ॥ कम्पनात्सिद्धिहानिः स्याद्धुननं बहुदुःखकृत् ॥ शब्दे जाते भवेद्रोगः करभ्रष्टा विनाशकृत् ॥ छिन्ने
सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥ जपान्ते कर्णदेशे वा उच्चस्थाने च विन्यसेत् ॥ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा
मता ॥ तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ॥ इत्युक्त्वा परिपूज्याथ गोपयेद्यत्नतो यती ॥ मालां मन्त्रञ्च मुद्राञ्च यस्तु
ध्यानं प्रकल्पयेत् ॥ प्रकाशने कार्यहानिरित्युक्तं तन्त्रवेदिभिः ॥ अङ्गुष्ठतर्जनीभ्याञ्च जपाच्छत्रुगणं भवेत् ॥ तर्जन्यङ्गु
ष्ठयोगेन शत्रूच्चाटनकारकः ॥ अङ्गुष्ठमध्यमायोगान्मन्त्रसिद्धिः सुनिश्चिता ॥ अङ्गुष्ठानामिकायोगादुच्चाटोन्मादने म
ते ॥ ज्येष्ठाकनिष्ठयोगेन शत्रूणां नाशनं यतः ॥ इति ते कथितं विद्वन् मालायाः परिनिर्णयः ॥ शङ्खपात्रे सवनं स्नानमन्य
थाद्भिः सकृत्तथा ॥ त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तत्र सम्भवेत् ॥ एकदा वा भवेत्पूजा न जपेत्पूजनं विना ॥ प्रातःकालेऽथ र
वा पूजा जपान्ते वा यजेद्धरिं ॥ प्रातःकालं समारभ्य जपेन्मध्यान्दिनावधि ॥ मध्यभावे स्थिता मन्त्राः केवलां वर्णरूपिणः ॥ सौ
षुम्नध्वन्युच्चरिताः प्रभुत्वं प्राप्नुयन्ति ते ॥ मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ॥ तामेव परमव्योम्नि परमामृत

वृंहिता॥ दर्शयेत्यान्मसन्तारं पूजाहोमादिभिर्विना॥ मनःसंहृत्यविषयान्मन्त्रार्थं मानसः॥ नद्रुतं न विलम्बञ्च जपेन्मौक्तिक
पंक्तिवत्॥ जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः॥ धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकां॥ उच्चरेन्मर्थमुद्दि
श्यमानसः सजपः स्मृतः॥ जिह्वोष्ठौ चालयेत्किञ्चिद्देवतागतमानसः॥ किंचिच्छ्रवणयोगाः स्यादुपांशुः सजपः स्मृतः॥
मंत्रमुच्चारयेद्वाचा वाचिकः सजपः स्मृतः॥ मानसादि त्रिभिर्भेदैः कथितं जपलक्षणं॥ मानसः सिद्धिकामानामुपांशुः
पुष्टिमिच्छतां॥ वाचिको मारणे प्रोक्तः कथितं जपलक्षणं॥ एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत्॥ देवस्य दक्षिणे ह
स्ते कुशपुष्पार्घवारिभिः॥ सजपान्तद्धि भावेवं प्राणायामत्रयं चरेत्॥ जपस्यादावथ चान्ते त्रितयं वितरं चरेत्॥ नन्यू
नं नाधिकं वापि जपं कुर्याद्दिने दिने॥ यदि कुर्यात्प्रमादात्तु नदा तेषु मवाप्नुयात्॥ न्यूने न्यूनाङ्गदोषः स्यादधिके चाधि
काङ्गकं॥ यथाविधि कृतानीह फलन्ति नान्यथा ततः॥ जपान्ते प्रत्यहं मंत्री होमं यत्न दशांशतः॥ तर्प्पणं सेकमित्येवं तत्त
द्दशांशतो मुने॥ प्रत्यहं भोजयेद्विप्रानन्यूनाधिकप्रशान्तये॥ विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवं॥ गोसुपुष्क॰

पणं कुर्य्याद्देवताभ्यो यशःप्रदः ॥ गोप्यापिप्रियमाणासु गोपामोऽयं प्रसीदति ॥ कर्म्मान्ते संस्मरेत् कृष्णं अन्तःकरण
शुद्धये ॥ नामसंकीर्त्तनं विष्णोः सर्व्वविघ्ननिकृन्तनं ॥ अथवा लक्षपूर्णौ च होमादि कृत्यमाचरेत् ॥ संपूर्णायां प्रति
ज्ञायां तर्प्पणादि तथाचरेत् ॥ विष्णोर्निवेदितान्नं यद्रात्रौ भुञ्जेदकल्मषयन् ॥ तदन्नादेवतायस्य तदन्नप्ररुषो भवेत्
शयीत कुशशय्यायां कम्बले वा कुशान्तरे ॥ एवं प्रतिदिनं कुर्य्याद्यावत्साङ्गं व्रतं भवेत् ॥ होमञ्च पूर्व्ववत्कुर्य्या
त्मायसैरथवा स्रुजेः ॥ होमाभावे जपं कुर्य्याद्धोमसंख्या चतुर्गुणं ॥ षड्गुणं चाष्टगुणितं यथासंख्यं द्विजातयः ॥ ९
शूद्रस्य विप्रभृत्यस्य तत्पत्नीसहशो जपः ॥ होमशून्यस्य विप्रस्य यो जपः स तु तान्त्रियः ॥ दशाक्षरं मनुवरं सिद्धये द
शलक्षकं ॥ जप्त्वा तदन्ते होमोऽपि विधिना कर्म्म चाचरेत् ॥ दशाक्षरं जपेन्मन्त्री सहस्रं दशकं जपेत् ॥ प्रत्यहं मुख्य
कल्पोऽयं अन्यं न्यूनमुदाहृतं ॥ अष्टादशार्णं मनुवरं पञ्चलक्षं जपेत्ततः ॥ कृत्वामेवं समुद्दिष्टं यस्य तत्कल्पसं
ग्रहात् ॥ तर्पयेणाञ्च ततः कुर्य्यात्तीर्थादेश्च तु मिथिते ॥ जले देवं समावाह्य पायाद्ये रुदकान्मकैः ॥ संपूज्य विधिवत्र

तयापरिवारसमन्वितं॥ एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत्॥ ततो होमदशांशेन तर्पयेत् पुरुषोत्तमं॥ आदौ मंत्रं समु
च्चार्य्य श्रीमूर्व्वं कृष्णमित्यपि॥ तर्पयाम्यहमित्युक्त्वा नमोऽन्तेर्पयेणा मनुः॥ तर्पणस्य दशांशेन अभिषेकं तथाचरेत्॥ न्यासानरो
धान् कृत्वा तु तदभेदेन पूजयेत्॥ कृष्णात्मानं स्वमात्मानं ध्यात्वा राश्मि समन्वितं॥ कुसुमं तोयमेकत्र सुगन्धि परिमिश्रितं॥ ज
लाञ्जलिं समादाय मूलमुच्चार्य्य साधकः॥ श्रीकृष्णमभिषिञ्चामि नमस्त्याभिषेचने॥ अभिषेकदशांशेन ब्राह्मणान् परितर्प
येत्॥ क्षीरखण्डाद्यभोज्यैश्च बहुमानपुरःसरं॥ विप्रभोजनमात्रेणाव्यङ्गं साङ्गं भवेद्ध्रुवं॥ सर्व्वथा भोजयेद्विप्रान् नैव कृत्मनतउ
वैतः॥ यत्र भुङ्क्ते द्विजस्तस्मात्तत्र भुङ्क्ते हरिः स्वयं॥ यत्र भुङ्क्ते श्रियः कान्तस्तत्र भुङ्क्ते जगत्त्रयं॥ गुरवे दक्षिणां दद्यात् भोजनाच्छाद
नादिभिः॥ गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेद्ध्रुवं॥ गुरुमूलमिदं सर्व्वमित्याहुस्तत्त्ववेदिनः॥ भिक्षान्नं वहुसंकार्य्यं भुञ्जीत वहु
भिः सह॥ एवं सिद्धमनुर्मंत्री साधयेत् सकलेप्सितं॥ एवं नित्यं च संकृत्वा नैमित्तिकमथाचरेत्॥ कृते नैमित्तिके विप्र नित्यस्य पूर्ण
ता भवेत्॥ अन्यथा नैव सिद्धिः स्यादनुष्ठानशतैरपि॥ मथुरायां महाक्षेत्रे वसन् कृष्णं समर्च्चयन्॥ लक्षमात्रं जपेन्मंत्रं एकमेनादी

क्षितं भवेत् ॥ मन्दरस्य महारण्ये सरलद्रुमकानने ॥ उपोष्य वन्यसम्भूतैः दुग्धाशी विजितेन्द्रियः ॥ लक्षमात्रं जपन् भक्त्या कृष्णं
यस्पति चक्षुषा ॥ वृन्दावनगतो मंत्री वार्त्रिंशस्थानमाश्रितः ॥ लक्षं कृत्वा जपेद्भक्त्या अणिमादिगुणान्लभेत् ॥ समुद्रगासरिन्म
ध्येकुट्टिमेति वसन् यती ॥ दुग्धाहारे जपेल्लक्षं यावत्कोटिभवोद्भवं ॥ नाशयत्यत्र सन्देहो वाक्सिद्धिश्चापि विन्दति ॥ पर्वताग्रेय
जेत्कृष्णं शालमूलफलाशनः ॥ लक्षं पञ्चाणि संजप्य खेचरीमेलनं भवेत् ॥ समुद्रगानदीतीरे तुलसीकानने वसन् ॥ लक्षमात्र
जपात्तत्र कोटिजन्माघनाशनं ॥ पुण्डरीकवकैः कृष्णं मासमेकं समर्चयन् ॥ धर्मार्थकाममोक्षाणि करस्थानि लभेत् ध्रुवं तुल
स्याभास्करे पद्मे होमयेद्दशसहस्रकं ॥ लक्ष्मीस्थिरा भवेत्तस्य पुत्रपौत्रानुयायिनी ॥ श्रीपुष्पैस्तु हुताश्चित्यं वैशाखे मासि दुग्ध
शः ॥ सर्वपापक्षयकरः सर्वसिद्धिप्रवर्द्धकः ॥ देवाः सर्वे नमस्यन्ति भक्त्या तं पुरुषर्षभं ॥ श्रीजलेशसर्पयेत्कृष्णं मनसपण्डिचन्दसं
युतैः ॥ अष्टोत्तरशतं कृत्वा पूजान्ते भक्तिनम्रः ॥ मण्डलाल्लभते सिद्धिं द्वाक्षरं स्वकवर्त्मना ॥ यद्यत्कामयते मंत्री अनायासा
ल्लभेत्तत्तत् ॥ दुग्धवृक्षाजलैर्नित्यमष्टोत्तरशतं शतं ॥ तर्पयेच्चारविलानकामान्लभेन्मोक्षश्चाविन्दति ॥ कुशपुष्पैः समभ्यर्च्य मा

समात्रं निरामयः ॥ यश्च सेवयन्मो वृद्धैश्च ब्रह्मचारी व्रतेस्थितः ॥ हयारिकुसुमैः शुक्लैर्मेधाऽलाद्यान्नि न भवेत् ॥ तथारक्ताम्बुमारेणाञ्
चलांश्रुतिमाप्नुयात् ॥ तथाद्वाभ्यां समभ्यर्च्य भुक्तिं मुक्तिञ्च विन्दति ॥ गोभक्तिः सदा कार्य्या गोभ्रुकराद्युपनन्तथा ॥ गोभक्तिस्त्वं प्रसन्ना
सुगोपालः सन्तुसीदति ॥ ब्राह्मणानां क्षत्रियाणां वैश्यानां शोयजन्मनां ॥ श्रीरामश्चैव महावाहो नैमित्तिकमिदं स्मृतं ॥ एते पांचैकमात्र
न्तु कृत्वा काम्यानि कारयेत् ॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतन्त्रोत्तमोत्तमे चतुर्द्दशोऽध्यायः ॥ ॥ त्रिकालाभ्यर्च्चनं व
क्ष्ये गोविन्दस्य यथाविधि ॥ मंत्रयोरुभयोः कार्य्यमन्यमाप्य नतदात्मतः ॥ कलायकुसुमश्यामं नीलेन्दीवरलोचनं ॥ वार्षिकञ्च शिशुं
मुग्धमासीनं पद्मविष्टरे ॥ भक्तविद्रुमविभ्रान्तकरपादाधरोज्ज्वलं ॥ गुञ्जालकाचयाछन्दमुखेन्दुग्रहसंवृतं ॥ कुन्देन्दुकाशसङ्काशं
हारभासि नदिङ्मुखं ॥ राजकुन्दद्युतिभासमानिनितानेकमौक्तिकं ॥ महार्हमरश्मिसंकीर्णं नुवर्णानेकभूषणं ॥ स्वबन्धुपूर्णपराङ्
च धेनुधुलीचयोरगया ॥ गोपीगोपगवां वृन्दैर्वीक्ष्यमाणं सुविस्मितैः ॥ ब्रह्मणा शङ्करेणापि प्रेमोत्कराघनस्तुवीक्षितं ॥ पुरन्दरमुखे
र्दैवैर्मुनिभिः संस्तुतं परं ॥ एवं ध्यात्वा यजेत् कृष्णं यज्ञे ज्ञातिभराननतः ॥ अजेयिन्द्रियवज्राद्यैरावृत्तित्रितयान्वितं ॥ क्षीरद्रवराजमट्ठ

226

ग्धस्वकदलीनवनीतकं ॥ वीवांद्रसाफलस्वाऽपि अन्यकालोद्भवञ्च यत् ॥ जपञ्चाष्टसहस्रं च कृत्वाष्टतत्प्रसादयेत् ॥ स्तोत्रैर्ना-
नाविधैर्भक्त्यानमस्कारप्रदक्षिणैः ॥ दुग्धवृक्षजलेदृष्टं शंतं संतर्प्य मंत्रवित् ॥ आत्मानं तत्कलारोजस्थलस्थः सन् समर्पयेत्
कुल्लायेणाख्यमनुना ततोऽस्य हृदं नयेत् ॥ पूर्वोक्तेन क्रमेणाथ शेषस्य तत्समापयेत् ॥ कृतशेषं निशाशीच एकाकी च निशां नये-
त् ॥ य एवं साममात्रं तु भक्त्या कृत्स्नं समर्पयेत् ॥ पूज्या लोके कविर्वाग्मी लक्ष्मीं प्राप्य प्रयायिनी ॥ पुत्रैर्मित्रैश्च सस्वत्वः प्रयात्यन्ते
परं पदं ॥ मध्याह्ने वासुदेवं तं राजमण्डलमध्यगं ॥ नारायणं सहस्रार्कदीपितं भवनान्तरे ॥ कल्पवृक्षसमाकीर्णं प्रुराप पक्षिति-
नादिते ॥ यम्बोत्पलादिकह्लारैः संकीर्णाभिरलंकृते ॥ तस्मिन्नसुपुलिने रम्ये स्वयाम्यां कल्पकस्य च ॥ रत्नस्तम्भैरत्नदीपैः मुक्तादाम-
विभूषिते ॥ नानाविचित्रचित्रान्तर्वितानशतसङ्कुले ॥ तत्पार्श्वे रचितं ध्यायेत्पुन्नागकेशरैः सह ॥ तथा नानाविधैर्वृक्षैः पाटलैश्चम्प-
कादिभिः ॥ बकुलैः सरलैर्बन्ध्यैः कुरुवकैर्वैष्टितैरपि ॥ सर्वर्तुकुसुमोपेतैः [illegible]व्याव नतशाखिभिः ॥ रत्नसिंहासनासीनां पुण्डरीकद-
लेक्षणं ॥ पृथुरक्तं सुप्रभ्याङ्गं राजन्यगणमोहनं ॥ पुण्डरीकाभनाभिं पुण्डरीकाक्षमव्ययं ॥ सुभ्रूललाटवदनं प्रभ्यहासं सुलो-

गौतमी
५०

चनं ॥ सुकपोलं सुनासोष्ठं श्यामलं मङ्गलाश्रयं ॥ नीलकुञ्चितकेशान्तं विचित्राम्बरभूषणं ॥ कम्बुग्रीवं सुविस्तीर्णकौस्तुभोद्भा
सिवक्षसः ॥ महावलीमहोरस्कं महाभुजचतुष्टयं ॥ वलीवन्धुरमध्येन राजद्धरशोभितं ॥ प्रदक्षिणगतश्रीमद्भवनाभिवि
भूषितं ॥ समारूढजानुजङ्घाभिः स्वस्तिकाङ्घ्रियुगात्मकं ॥ नूपुरत्नरवंचित्रतुङ्गपादाङ्गुरीयकं ॥ अनेकविधरत्नादिपीताम्बरसु
गावृतं ॥ स्फुरितोरस्कवत्सेन शोभितं वनमालया ॥ रत्नतारैश्च सौवर्णैर्ग्रैवेयकविभूतियं ॥ केयूरमणिसम्बन्धवरांगजभुजचतुष्ट
यं ॥ विचित्रकटकैर्युक्तं तनुदरैर्याद शोभितं ॥ नानारत्नमयैर्हैमैरङ्गुरीयैर्विराजितं ॥ अनन्तरत्नसंछन्नस्फुरन्मकरकुण्डलं ॥ सौ
वर्णनाभिरुचिरनानाचित्रविचित्रितैः ॥ नोलनस्त्रमरसंछन्नैः प्रसुनैर्मकुटोज्ज्वलं ॥ शङ्खचक्रगदापद्मधरं शान्तसुखेक्षणं ॥ दि
व्यलक्षणसम्पन्नं दिव्यभूषणभूषितं ॥ दिव्यमालाम्बरधरं दिव्यगन्धानुलेपनं ॥ ललाटे हृदये कुक्षौ कण्ठबाह्वोश्च पार्श्वयोः ॥ वि
राजितोर्द्ध्वपुण्ड्रेण चन्दनेन विभूषितं ॥ सहीमारभूतानि तत्त्वेयन्नं मुहुर्मुहुः ॥ ऊर्द्ध्ववादिमन्त्रिवरैर्मन्त्रयन्तं मुहुर्मुहुः ॥ तेषामि
पातनाय वधमोर्थनीतियुक्तिभिः ॥ एवं मध्याह्नसंप्राप्तेकाले ध्यात्वा जगद्गुरुः ॥ आवाह्य विधिवद्भक्त्या पूजयेन्नूपचारकैः ॥ सङ्ग

२२५

तंत्र
५०

पूर्व्ववदुद्दिक्षु पूर्व्वादि प्रपूजयेत् ॥ रुक्मिणीं सत्यभामां च कालिन्दीं च सुलक्षणां ॥ नाग्नजितीं जाम्बवतीं मित्रविन्दां सुशीलि
का ॥ इत्यष्टशक्ति देवस्य पूज्याः कृष्णस्य वल्लभाः ॥ अग्रेसु दर्शनं चक्रं नैरृत्ये च जलान्तर ॥ वायव्ये च गदां दिव्यां ईशाने पद्ममु
ज्ज्वलं ॥ ततो दलानां वाह्ये च वसुदेवञ्च देवकी ॥ नन्दगोपं यशोदाञ्च पूर्व्वादिं प्रपूजयेत् ॥ पाद्यैरर्घ्यैस्तथा पुष्पैः पूर्व्वादिदल
तोऽर्च्चयेत् ॥ वलभद्रं सुभद्राञ्च रोहिणीञ्च तथा परे ॥ सुदामञ्च तथा दामं वसुदामञ्च किङ्किणीं ॥ देवस्य वामपार्श्वे तु पूजयेद्
गुरुपादुकाः ॥ परमञ्च गुरुं तत्र परापरगुरुं तथा ॥ पादुकानां समभ्यर्च्य पूर्व्वसिद्धं तथा यजेत् ॥ पूर्व्वे गणपतिं यष्ट्वा तद्वहिः प
रिपूजयेत् ॥ इन्द्रादिलोकपालांश्च स्वस्वदिक्षु स्वमन्त्रतः ॥ कुमुदं कुमुदाक्षञ्च पुण्डरीकञ्च वामनं ॥ शङ्कुकर्णं सर्व्वनेत्रं सुमुखं
सुप्रतिष्ठितं ॥ दक्षिणावर्त्तमेतानि पूर्व्वादिदलतोऽर्च्चयेत् ॥ उत्तरेशानयोर्मध्ये विष्वक्सेनं समर्च्चयेत् ॥ संपूज्यैवं हरिं भक्त्या
नैवेद्यञ्च निवेदयेत् ॥ पायसं शर्करापूपं खण्डखाद्यं कदलीफलं ॥ सितोपदंशमन्नं च स्वर्णपात्रे निवेदयेत् ॥ अथवा रौप्यपात्रे
चताम्रपात्रेऽथवा पुनः ॥ अभावात् पद्मपत्रे वा अन्यथा नरकं व्रजेत् ॥ सुवर्णं च सकेवाथ रौप्यं वा विधिना ततः ॥ सशर्करं पक्व

गौतमी· दुग्धं अन्नं व्यंजनपायसं॥ नानाविधोपहाराणि गोविन्दाय निवेदयेत्॥ राजोपचारं दत्वा तु स्तुत्वा नत्वा विसर्ज्जयेत्॥ यः एवं चि
५१ न्तयेद्देवं गोपालं विगतस्पृहः॥ राजानः किङ्कराः सर्वे सामान्याः सपरिच्छदाः॥ राजपुत्राश्च पत्न्यश्च सर्वे तस्यानुवर्त्तिनः॥ इह भु
क्त्वा वरान् भोगानन्ते विष्णोः पदं व्रजेत्॥ अष्टोत्तरशतं होमं कुर्य्यात्तत्संख्यया दतः॥ होमतर्पणयोर्मंत्री साधयेदखिलानपि॥ प्रा
तर्होमं प्रकुर्वीत तथा मध्यन्दिनेऽपि वा॥ रात्रिहोमश्च मध्याह्ने कुर्य्याद्देवं विधिः स्मृतः॥ तृतीयकालपूजायामस्ति कालविकल्पना॥

सायाह्ने निशि वेत्यत्र वदन्त्येके विपश्चितः॥ अस्ता दर्शार्णो सायाह्ने रात्रौ चेद्दशवर्णकं॥ उभयीमुभयेनैव वदन्ति ब्रह्मवादिनः॥
सायाह्ने द्वारवत्यान्तु चित्रकोद्यानमध्यगः॥ सौगंधिकोत्पलसनीदीर्घिकाशतवेष्टिते॥ नानारत्नमयोल्लासिप्राचीरद्वारशोभिते
॥ महारत्नमयं गेहं मुनिभिः परिवेष्टितं॥ नारदाद्यैर्मुनिवरैः शौनकैः पिप्पलादिभिः॥ सनकादिब्रह्मपुत्रैः परीतं तत्वनिर्णये तंत्र
नारदं पर्वतं जिष्णुं निशठोद्धवदारुकं॥ विष्वक्सेनं सशैनेयं कृपादृष्टिविलक्षितं॥ तेभ्यो मुनिभ्यः स्वधामं दिशन्तं परमक्षरं॥ चन्द्र ५१
कोटिप्रतीकाशं दिव्यावकाशदीपितं॥ नानारत्नगणाकीर्णं महामुकुटभूषितं॥ अनेकरत्नराश्यकसन्मकरकुण्डलं॥ भास्वन्म

वनीराजल्लसत्कौस्तुभवक्षसा ॥ नानारत्नगणाकीर्णकेयूरवलयाद्यकं ॥ विद्युत्वनकाभासपीताम्बरयुगावृतं ॥ कम्बुग्रीवोदरजठ
रंगभीरनाभिपङ्कजं ॥ उत्तुङ्गचरणान्तोजलस्वर्णाङ्गुरीयकं ॥ प्रदीप्तरत्नकटकतुलाकोटिद्वयान्वितं ॥ शशरक्ताधरपूर्णमार
त्नपदपङ्कजं ॥ शङ्खचक्रगदापद्मधारिणं वनमालिनं ॥ शुद्धज्ञानं स्वभावत्वात्सुप्रसन्नं तं परात्परं ॥ अज्ञाननाशकादयद्भुतनवबा
रिजसन्निभं ॥ सूर्य्यकोटिप्रतीकाशमविद्याध्वान्तनाशनात् ॥ इत्येवं परमात्मानं ध्यायन्ति ब्रह्मवादिनः ॥ एवं ध्यात्वा मध्यमार्चो
विधानेन प्रपूजयेत् ॥ सहस्रैकं जपेन्मन्त्रं होमं दशांशतर्पणं ॥ रजताराजिते पात्रे स्वरोऽदुग्धानि विदयेत् ॥ पूर्वोपचारेण द
त्वाथ नमस्कृत्वा विसर्जयेत् ॥ गृहस्थानां वनस्थानां मासिकाहप्यादेस्वजे ॥ ध्यात्वा संपूज्य मुनिभिर्मोनमैहपचारकैः ॥ विविक्ता
गृहमेधीच मुनिभिः सह पूजयेत् ॥ वासुदेवादिभिर्यापिनिर्वाणपदमाप्नुयात् ॥ सायान्हे वासुदेवञ्च पूजयेद्विधिनानरः ॥ देवाः
सर्वे नमस्यन्ति किं पुनर्नरमर्कटाः ॥ संसारसागरं घोरं विषमं नक्रसंयुत ॥ सन्तीर्य्यविमयानन्तुक्ताज्ञानीतेपदमाप्नुयात् ॥ दु
र्वासनां परित्यज्य कोटिजन्मसमुद्भवां ॥ एकेन जन्मना मुक्तिं याति कैवल्यनिर्मितं ॥ नाद्विष्णोः परं मन्त्रं दसदा नस्यन्ति पुरुषः ॥ ग

गौतमी· ५२

२२९

त्रैचेन्मृन्मथाकारं मानसे देवकीसुतं॥ रासगोष्ठीपरिश्रान्तं गोपीमण्डलमध्यगं॥ वृन्दावनतरोर्मध्ये च्छायायां कशाथिनः॥
सस्थितं वेणुगायन्तं वनमालापरिवृतं॥ पीताम्बरधरं श्यामं गोपीकासंघवेष्टितं॥ देवासुरैश्च गन्धर्वैरप्सरोभिश्च सेवितं॥ यक्षै
र्विद्याधरगणैर्दिहकैः भूमिमयनुगतैः॥ ब्रह्मर्षिभिः देवर्षिभिः स्तूयमानं स्वविस्मितैः॥ नानाविधैरप्सरोभिर्वीक्ष्यमाणं सुविस्मितैः॥
लेलिह्यमानगन्धर्वैर्देववंशीशतकोटिभिः॥ इन्दीवरनिभं कान्तं सुन्दरेन्दुवराननं॥ संफुल्लपद्मवदनं पद्मपत्रनिभेक्षणं॥ पद्म
रागाभिपाणिपादं पद्मनाभिनिभाधरं॥ शारदाशैर्वभूतानां गोपिकाजनवल्लभं॥ क्वचिन्नृजयपरिमिलत्पंकजा परिसंस्थितं॥ कल्पि
तानेकदेहेन यारीणां सतकोटिभिः॥ वेष्टितं रममाणश्च गायन्तं दिव्यमूर्छनैः॥ द्वाभ्यां द्वाभ्यां वहुभाभ्यां मध्ये मध्ये विराजितं॥ य
थामरकतस्तम्भं सुवर्णैर्नाभिवेष्टितं॥ क्वचित्क्रीयाजनास्त्रे हारिणां ह्लयान्वितं॥ क्वचिद्धसन्तं हासन्तं स्त्रीवृन्दमुपहासकैः॥ तंत्र ५२
निर्मितं देवनिकरैर्वेष्टितं पुष्पवृष्टिभिः॥ दिव्यस्त्रीभिर्वीक्ष्यमानं क्वामोत्कण्ठितचेष्टितं॥ एवं ध्यात्वा मधुरिपुं यजेत्तं संमितं वत
॥ मिथुनैश्च षोडशकैः केशवादिभिरावृतं॥ महिषीभिर्नायीवीतं गोपीभिरपि सर्वतः॥ एवमभ्यर्च्य विधिना कांस्यवारजताचिते

पात्रे दुग्धेन नैवेद्यायमिथनेभ्यस्तथार्पयेत् ॥ जप्त्वा स्तुत्वा नमस्कृत्य हृत्पद्मे तं विसर्जयेत् ॥ एवमभ्यर्च्य जगतां पतिं शुद्धमना यतिः
॥ धर्मार्थकाममोक्षाणां दायादो भवति ध्रुवं ॥ विप्रो वेदाधिपो भूयात् साक्षाद्भूमिपुरन्दरः ॥ क्षत्रियो राजवर्य्यश्च वैश्यो धनसम
द्धिमान् ॥ शूद्रः सुखानि सर्वाणि भुक्त्वा चान्ते परं व्रजेत् ॥ एवं ते कथितं विप्र संसारभयनाशनं ॥ अर्च्चनात्रिविधा यातु मूल-
विद्यानि कृन्तनं ॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वमन्त्रोत्तमे पञ्चमोऽध्यायः ॥ ॥ गौतम उवाच ॥ ब्रूहि मे बालकृ-
ष्णत्वं तव सर्वज्ञ कारणं ॥ ब्रह्मणा पद्मजाप्रोक्तं सेवया तव सोऽस्थितः ॥ यत्प्रसादान्मुनिश्रेष्ठ त्रैलोक्यविदितं नते ॥ यथात्र मंक-
थय मे सर्वमेव समाहितः ॥ शुश्रूषा मे वर्त्तते गोपालस्यार्च्चनं प्रति ॥ नारद उवाच ॥ वात्स्यनो कथयाम्यद्य देवस्य परमाद्भुतं गो-
पनीयं न ते किंचित्त्वं हि वेदविदां वर ॥ तपसा कल्मषमनाः कृष्णे भक्तोऽसि निश्चयात् ॥ नारः प्रजापतिः शक्रो माया च विन्दुरेव च
एतन्मन्त्रवरं सिद्धिरहस्यं परमाद्भुतं ॥ महाचमत्कारकरं रिपुक्षोभणकारकं ॥ चतुर्वर्गफलं चास्य जपमात्रेण सिध्यति ॥ गोपाल-
स्यापि ये मन्त्रा वक्ष्यन्तेऽत्रैव तन्त्रके ॥ सन्दीपितमनेनैव फलप्रदमवेक्ष्यतां ॥ चूडामणिरयं प्रोक्तो देवस्य शिशुरूपिणः ॥ अहं मुनि

गौतमी. :समाख्यातो गायंत्री छन्द उच्यते॥ देवताकथितः कृष्णः सर्वकामफलप्रदः॥ समाहारोच्चारणोऽयं मध्यमस्वर ईरितः ने
५३ त्राकितकं सर्व्वेहेतुः कालवर्णविभेददितः॥ पञ्चाङ्गानि मनोः कृत्वा ध्यानं कुर्य्यात्समाहितः॥ मथुरायां पुरे ध्यायेत्कंसस्थाने तु प
राजिते॥ सूतिकागृहमध्यस्थं जातमात्रं जगत्पतिं॥ सिद्धचारणगंधर्व्वैर्देवदानवकिन्नरैः॥ यक्षराक्षसवेतालैः खेचरैर्दि
कचरैरपि॥ विद्याधरीभिर्देवीभिः किन्नरीभिः समन्ततः॥ ब्रह्मणा तनयैः सार्द्धं वीक्ष्यमाणं मुदान्वितैः॥ इन्द्रादिभिश्च दिक्पा
लैनसनकसुमहर्षिभिः॥ चतुर्भुजं शंखचक्रगदापद्मधरं हरिं॥ दक्षस्योर्द्ध्वकरे चक्रं गदां च तदधः करे॥ वामस्योर्द्ध्वे पाम्बेध
२८० तुः शंखं च तदधः करे॥ नवीनजलदप्रख्यं पीतकौशेयवाससं॥ विलसत्कुण्डलाभोगभास्वरे निजमूर्द्धनि॥ विहिताशेषसद्रत्नो
शोभिस्वर्णकिरीटकं॥ सुगंधिपारिजातैश्च शोभिताशेषकुन्तलं॥ ललाटतटविन्यस्तकस्तूरीतिलकोज्वलं॥ अष्टमीचन्द्रशा(तंत्र
कलभालमालतलोज्ज्वलं॥ उत्फुल्लपुण्डरीकश्रीनयनद्वयभासितं॥ मनोभवधनुःकल्पचिल्लीचापरिराजितं॥ तिलप्रसूनवि ५३
जयिनासावंशविभूषितं॥ परार्द्धचन्द्रसंकाशमुखचन्द्रविराजितं॥ दाडिमीबीजकुन्दाभदन्तपंक्तिमनोहरं॥ मद्यविम्बफलो

ञासितदन्तवासोज्वलंविभुं॥जाम्बुनदानेकरत्नस्फुरन्मकरकुण्डलं॥महामरकतस्तम्भभासमानभुजाकारं॥रत्नचामीकरा
भोगेरङ्गदैर्वलयैर्युतं॥कम्बुग्रीवंमहारङ्कमुक्ताहारविराजितं॥श्रीवत्सलाञ्छनंभ्राजत्कौस्तुभोज्वलवक्षसं॥रत्नवैडुर्य
घटितकिंकिणीजालमालिकम्॥पट्टसूत्रेणसम्बद्धमध्यदेशोपशोभितं॥रत्नमञ्जीरयुगलमंजूश्रीपादपल्लवं॥देवक्याव
सुदेवेनहर्षेणविधिनातथा॥विधिस्तुतिस्तुतांस्तोत्रमुखरेणपुटाञ्जलिं॥महत्शृङ्गप्रतीकाशंगरुडोपरिसंस्थितं॥एवंध्या
त्वायरात्मानंगुरुमात्मानमेवच॥एकीभावेनसंभाव्यततःपूजनमारभेत्॥कर्पूरमालितालोलासितचन्दनचर्च्चिते॥आलि
खेद्देवकीपुत्रयंत्रंशोभनरेखया॥शलाकयावैडूर्यमयातथावापिचहेमया॥किंजल्करूपकंवृत्तंततोलेख्यंचतुर्दलं॥ततो
वृत्तद्वयाष्टदलंलिखेद्दशदलंततः॥समरेखंचतुष्कोणंचतुर्द्वारसुशोभितं॥वीजशोभिचतुर्द्वारेचतुष्कोणविराजितं॥मध्येसं
पूज्यदेवेशपूजयेच्चतुर्द्दले॥ऐशान्यामीश्वरंदेवमाग्नेय्यांचापितामहं॥नैरृत्यांवसुदेवञ्चवायव्यामम्बिकामपि॥तथाचाष्टसु
पत्रेषुपूजयेद्देववल्लभाः॥रक्ताम्बरधराःसौम्याःकराम्बुजधृताम्बुजाः॥सर्वालङ्करणाढ्यानालसद्यौवनविभ्रमाः॥श्रीमद्देव

सुखासीनो जन्यस्तेनेत्र मधुव्रताः॥ ततो दशदले पूज्या लोकपालास्ततो वहिः॥ गरुडं पश्चिमे द्वारे जयं पूर्वे प्रपूजयेत्॥ विद्येजे
दक्षिणे तद्वत्वारदं च तथोत्तरे॥ प्रष्टाञ्जलिकराः सर्वे स्तुवंतोत्र सुखरा अपि॥ विलसद्वनमालाश्च पीतकौशेयवाससः॥ ततः शं
खं च चक्रं च गदां कौमुदकीमपि॥ शार्ङ्गं धेनुश्च संपूज्य तथाष्टे पूजयेदपि॥ ऐरावतादीनभ्यर्च्य गणान् शेषो ततो वहिः॥ कृते
लक्षं जपेन्मंत्रं त्रेतायां द्विगुणं तथा॥ त्रिलक्षं द्वापरे जप्त्वा चतुर्लक्षं कलौ जपेत्॥ प्रयोगानथ कुर्वीत साधकः सिद्धिलालसः॥ ल
क्ष्मीप्रसूनैर्जुहुयात् स्त्रियमिच्छन्ननिंदितां॥ आज्येनान्नेन जुहुयात् साक्षाच्चमसमृद्धये॥ आरोपैः कुसुमैर्विप्रान् जातीभिः पृथिवी
पतीन्॥ प्रसूनैरसितैर्वश्यान् शूद्रान् नीलोत्पलैरपि॥ वशे मूलवर्णैः सर्वो न पंकजैर्वनिताजनान्॥ गोपालासुकृतो होमः पायसे
न समर्पितः॥ गवां शान्तिं करोत्याशु गोविन्दो गोकुलप्रियः॥ शिशुवेशधरं देवं किंकिणीजालशोभितं॥ स्मृत्वा प्रणमेये मंत्री दुग्ध
बुध्यां शुभैर्जलैः॥ धनं धान्यं पशुं चादीन् प्रीतस्तस्मै ददात्यसः॥ पित्राऽमूलेन वीतं दहन् प्रत्युगे कोणराजत्वडगं कुर्यात्पनंद
शार्ङ्गं स्फुरितदशदलं कामवीजेन वीतं॥ अष्टाक्षरेणासंवीतं मंत्रं गोविन्ददैवतं॥ धर्मार्थकामफलदं सर्वरक्षाकरं स्मृतं॥ पंच

त्तकोधरसंस्थो मनुबिन्दुविभूषितः॥ पिण्डबीजमिदं प्रोक्तं सर्वसिद्धिकरं परं॥ चतुर्लक्षं जपेदेतत् तद्दशांशं हुनेत्ततः॥ तर्पयेत्तद्
शांशं च दशांशश्चाभिषेचयेत्॥ ब्राह्मणान् भोजयेच्चापि दशांशमिति च क्रमात्॥ गणेशं भास्करं रुद्रं गौरीश्चमरि पूजयेत्॥ वि
दिक्षु यंत्रराजस्य स्वस्वमंत्रैः परः सरं॥ एतद्धारणमात्रेण त्रिकालज्ञो भवेन्नरः॥ यद्यन्निजेप्सितं सर्वं साधयेन्नात्र संशयः
अनेन सदृशो मंत्रो यंत्रश्चापि न विद्यते॥ केवलं प्रेमभावेन कथितं तव सुव्रत॥ ॥इति श्रीगौतमीयमहातंत्रे सर्वतंत्रो
त्तमोत्तमे षोडशोऽध्यायः॥ ॥अथ प्रयोगान् वक्ष्यामि मंत्रयोरुभयोः समान्॥ यान् कृत्वा साधकवरो लोकद्वयसुपूजि
तः॥ तदात्मकारि मंत्रान् वै वक्ष्यामि च याचित्काचित्॥ वन्देत्तं देवकीपुत्रं सद्योजाताम्बुजप्रभं॥ शङ्खचक्रगदापद्मधारिणं वन
मालिकं॥ एवं ध्यात्वा मनुवरं लक्षं ब्राह्मे मुहूर्त्तके॥ जप्त्वा मेध्यं परां प्राप्य कवीनामग्रणीर्भवेत्॥ अथवा स्फटिकाभासं द्विभु
जं लेखपुस्तकं॥ धारिणं विचिन्त्यावलक्षं ब्राह्मे मुहूर्त्तके॥ जपत्वा मंत्रं त्रिकालज्ञो वृहस्पतिसमो भवेत्॥ अथवैतत्स्मो मं
त्रः प्रोच्यते शृणु तत्ततः॥ श्रीमत्पदं तथा चोक्तं कुमुन्दचरणौ ततः॥ सदेति परगामहं प्रपद्ये स्वाहया युतः॥ इमामलं कोमलं ८

वालंक्रीडन्तंमातुरङ्के॥द्विभुजंस्तनपानावेचिन्तनन्क्वातिधरोभवेत्॥लक्षम्वाप्रजपेदेनंसमानेलभतेफलं॥काम
वीजाख्यमंत्रोऽयंकिंनसिध्यतिभूतले॥उपसंहृतदिव्याङ्गंप्रेरेवमातुरङ्कगं॥चलजोश्वरणांबालंध्यानाद्दुल्येमहुर्त्ते
के॥जपृत्वामनुवर्णोविद्वान्सर्वेशास्त्रार्थवन्नवेत्॥सर्ववेदार्थकुशलोज्ञानवानभवतिध्रुवं॥नन्दाङ्गनेयघंघटन्तंधूली
नीचयध्रुसरं॥प्रदीप्तमणिगणोदीप्तंयशोदालोकनोत्सुकं॥एवंध्यात्वामन्त्रवरंजयेन्नियममाश्रितः॥लक्षैकजपनाद
स्यकिंनसाध्यतिभूतले॥प्रातःप्रातःपिवेत्तोयंमन्त्रेणाष्टशतंजपन्॥अनेनमुकोऽपुस्पार्थोजडःपाषाणवत्तथा॥अनेन
जलपानेनसाक्षाद्वाक्पतिसन्निभः॥जायतेनात्रसन्देहःसत्यसत्यंनचान्यथा॥यस्यांनिक्षिप्यशाकटंरुदन्तंप्राकृतंन(
था॥लक्षंजप्यादितिध्यात्वाआपन्मोमुच्यतेध्रुवं॥शक्रभ्योनभयन्तस्यराजतोदस्युतोऽपिवा॥नतस्यविद्यतेभीतिःकदाचिद
पिसुव्रत॥ अथापरंप्रवक्ष्यामिरहस्यंसुरपूजितं॥यज्ज्ञात्वासाधकवरंप्रयोगफलमाप्नुयात्॥वलानांसोमसंयु
क्तंमूर्द्धिस्वरविभूषितं॥किन्तुनादसमाग्रानंकल्पराजंसमुद्धरेत्॥एववंवीहिहैत्रस्यंमहामायास्वरान्वितं॥विन्दुनादस

२५२

माक्रान्तंद्वितीयंवीजमुद्धरेत्॥वान्तंरेफसमायुक्तंचतुर्थस्वरभूषितं॥षदिविन्दुसमायुक्तंतृतीयंवीजमुद्धरेत्॥थान्तंश
न्तुसमायुक्तइन्दुविन्दुसमन्वितं॥दौर्गंवीजमितिख्यातंसमस्यायन्त्रिवारयां॥शक्ताःपदंवह्नियुतंमायाविन्दुसमन्वितं॥अ
शेषजगतांवीजंमहामायेतिविश्रुतं॥अनयायोजितोमंत्रीअसाध्यमपिसाधयेत्॥वान्तंवह्निसमायुक्तंचतुर्थस्वरभूषितं
॥श्रियोवीजमितिप्रोक्तंनृणांसर्वसुखप्रदं॥विरिञ्चीन्दुसमायुक्तंचतुर्थस्वरभूषितं॥नादविन्दुकलाक्रान्तंवीजंत्रैलोक्यमो
हनं॥प्रोक्तंसनातनाक्षरंतत्तुषष्ठस्वारसमन्वितं॥नादविन्दुकलायुक्तंकूर्च्चंवीजमितिस्मृतं॥एतेषांवीजवर्याणांज्ञात्वाकर्म्मो
णिमंत्रवित्॥गुरुतःशास्त्रतःसम्यक्सर्वकर्माणिसाधयेत्॥अन्यथानैवसिद्धिःस्यान्मंत्रःकल्पशतैरपि॥मेरुश्चतुर्दशस्वरः
अधोवह्निसमन्वितः॥नृसिंहवीजमित्युक्तंभूतापस्मारनाशनं॥समाहितमनाभूत्वायमाक्षैःकृतमालया॥अयुतैकंजपेन्मंत्रं
तुल्यचारित्रितेरतः॥अल्पायासेनकामाःस्युर्दारिद्र्यंचनजायते॥सर्वेमनोरथास्तस्यसिध्यन्तीतिनसंशयः॥नित्यंकश्मीरतःकृ
ष्णवस्त्रपुष्पैःप्रसमर्च्चयेत्॥वश्याभवन्तिसर्वेचब्राह्मणानात्रसंशय॥गोयानवेशंमनसाजातीपुष्पैःसमर्च्चयेत्॥वश्याभवंति

राज्ञातो नात्र कार्य्या विचारणा ॥ नदेवरक्तपुष्पैश्च वेश्या वश्या भवन्ति हि ॥ नीलोत्पलैश्च शुभ्राः सुगन्धैः सकुम्भं समर्चयेत् ॥ जुहु
याद्रक्तकुसुमैर्मिश्रितैस्तिलतण्डुलैः ॥ मंत्रेणानेन सहस्रन्तु जपत्वा भस्म धारयेद् यतिः ॥ ललाटे विधृते तस्य सर्वे वश्या भवन्ति
हि ॥ अनेन च शरीरेण राजानो वशतामियुः ॥ स्त्रियो वश्या भवन्त्यस्य पुत्रामात्याश्च सर्वथा ॥ विवाहार्थी जपेन्मंत्रं मासमष्ट
सहस्रकं ॥ मासमण्डलमध्यस्थं कृष्णं ध्यात्वा त्रिनोस्थितः ॥ विवाहयेत्तु तमानां रम्यां सर्वकुलोज्ज्वलां ॥ पुत्रं मे रक्ष रक्षेति द्विजै
न प्रार्थितो हरिः ॥ हतं पुत्रं समाहृत्य ददौ यत्नं विचिन्तयेत् ॥ पुत्रकामो लभेत्पुत्रं मासेनैकेन सुन्दरं ॥ दीर्घायुषं प्रतिहतं
बलवीर्य्यसमन्वितं ॥ कुन्दपुष्पैः समाराध्य कृष्णं ध्यायेच्च कन्यका ॥ मासद्वयं तथा मंत्रं जपेदष्टसहस्रकं ॥ मनोरथपतिं
लब्ध्वा दीर्घकालञ्च क्रीडति ॥ अञ्जनं कुसुमं वस्त्रं ताम्बूलं चन्दनं तथा ॥ अन्यान्यानुपभोगानि स्पृष्ट्वा मंत्रं शतं जपेत् ॥ दीय
ते यस्य यस्यापि सोऽचिराद्दासवद्वशी ॥ स्त्रीयो दश्याश्च अनेनैव भवन्ति मुनिसत्तम ॥ पुरुषं वशयेन्नारी अनेनैव विधानतः ॥
अज्ञात्वा कामः श्रीपुष्पैः सितं तण्डुलमिश्रितैः ॥ अष्टोत्तरसहस्रन्तु जुहुयाद्दानवान् भवेत् ॥ विश्वरूपधरं ध्यात्वा शतम

233

स्तोत्रं जपेत् ॥ समाहितमनाः श्रीमान् यशस्वी कीर्त्तिमान भवेत् ॥ प्रेतभूतपिशाचाश्च स्कन्दादिग्रहपीडितैः ॥ पूतनाशनयात्ता
ं ध्यात्वा मंत्रं शतं जपेत् ॥ प्राणस्यान्ति ग्रहा दुष्टाः पलायन्ते इतस्ततः ॥ सर्पमण्डलदष्टोच मूषिकाद्यैश्च दंशितान् ॥ कृष्णं कालीयद
मनं चिन्तयित्वा जपेन्नर ॥ तर्जयन्तं विषं घोरं हुंकारेणाविनाशयेत् ॥ अन्नाय्यन्त्यो मन्त्रः तु स्वबीजाद्यं भूषणं ततः ततः ॥ कालीयस्य फणाम
ध्येदि न्यनृत्य करोतिच ॥ नमामि देवकीपुत्रं नृत्यराजानमच्युतं ॥ जरार्त्तोऽभ्यर्च्चयेन्मंत्री जपेदष्टशतं तथा ॥ ज्वरेण संयुतं कृष्णं बल
प्रद्युम्न संयुतं ॥ दहन्तं बाणनगरीं गरुडोपरि संस्थितं ॥ त्रिजज्वरेण संपिष्टु ध्यात्वा नाशयन्ति क्षणात् ॥ शीतलाकामलादीनि तथा
चातुर्थकोऽन्नवान् ॥ प्लीहगुल्मश्च कृधासुअ पस्मार भवन्तथा ॥ नाशयेन्नात्र संदेहो दृष्टिमात्रेण मंत्रिकः ॥ गोपालं यष्टियाशश्च धेनु
मादाय संस्थितं ॥ ध्यात्वा कृष्णं जपेन्मंत्रं पशुमान सप्त मासतः ॥ राज्ञः पूरो धाभवित्रमिति यस्य मतिर्भवेत् ॥ मधुसिक्तैः सितैः पुष्पैर्ह
त्वा न स्मरणाल्लभेत् ॥ महैश्वर्य्यमथ प्राप्य विश्वख्यातो भवेद् ध्रुवं ॥ गोवर्द्धनधरं कृष्णं ध्यात्वा मन्त्रं जपेन्नरः ॥ वातवर्षादिभिर्घो
रे भयेसमप्युपस्थिते ॥ भयमाशु विनश्येत नात्र कार्य्या विचारणा ॥ वृन्दावनगतं कृष्णं वृष्टिकामो विचिन्तयन् ॥ जपेदष्टसहस्र

नु वृष्टिमाप्नोत्यसंशयं ॥ एवञ्च मनसा ध्यात्वा वृष्टिं वर्षासु चावहेत् ॥ एवं जलाशये ध्यात्वा जपेदष्टसहस्रकं ॥ वृष्टिर्भवत्यकाले
ऽपि महती नात्र संशयः ॥ गायन्तं वेणुना कृष्णं गानकामो विचिन्तयन् ॥ आज्यमष्टशतं हुत्वा किन्नरैः सह गीयते ॥ जयकामो जपेदयु
तं हस्तं कल्पकद्रुमं ॥ संस्मरन् देवताभिर्जु[illegible]डारूढमच्युतं ॥ ध्यात्वा रक्तं करवीरसमिद्भिर्जुहुयाद्दशा ॥ अष्टोत्तरसहस्रन्तु पक्षा
न्पराजितो रिपुः ॥ राजादिभयमापन्ने संशये दुर्गसंसदि ॥ हुत्वा दशसहस्रन्तु नक्षत्राण्नाशयेत् ध्रुवं ॥ नीलोत्पलादिभिः पुष्पैरु
ष्टोत्तरसहस्रकं ॥ शंखादिनिधिसंयुक्तं द्वारकामध्यगं हरिं ॥ ध्यात्वा तण्डुल दूर्वादि हुत्वा शान्तिकमाहरेत् ॥ कदम्बमूले गायन्तं गो
पालं वनमालिनं ॥ कदम्बपुष्पैः संस्पृष्टं चिन्तयित्वा जनार्द्दनं ॥ अपामार्गशतं हुत्वा जपेदष्टसहस्रकं ॥ सर्वान्कामान्वशीकृत्य आंड
विज्ञो भवत्यपि ॥ राजद्वारे सभायाञ्च व्यवहारे च मन्त्रवित् ॥ सप्तमष्टशतं जप्त्वा प्रथमं वाक्यमुच्चरेत् ॥ अनेनैव विधानेन सर्वेत्र विज
यी भवेत् ॥ मोक्षकामो जपेद्यन्तं पुण्डरीकाक्षमव्ययं ॥ सनकाद्यैः स्मृतं कृष्णं शुक्लाम्बरधरं परं ॥ शंखचक्रधरं ध्यात्वा मन्त्रं लक्षं जपे
न्नरः ॥ ताराभ्यां प्रतिनं कृत्वा विधिवद्ध्यानमाश्रितः ॥ वक्षात्तु मण्डले कृष्णं पूजयन्भक्तिमावहन् ॥ संसारसागरात्साध्यामुच्यते नात्र सं

शयः ॥ यदिच्छेत्सर्वलोकानां मन्त्री वशीकर्तुं जगत्त्रयं ॥ वन्यैर्मनोहरैः पुष्पैर्वेणुं गायन्तमच्युतं ॥ ध्यात्वा संपूज्य विधिवल्लक्षमेकं महोमकं ॥
जप्त्वा समस्तलोकानां प्रियो भवति नान्यथा ॥ दिव्यपद्मं सुखं भुक्त्वा याति विष्णुं तनुं द्विज ॥ अर्चयन्मनसा कृष्णं सहस्रं प्रत्यहं जपेत् ॥ वत्स
राल्लभते मोक्षं यज्ज्ञात्वा न निवर्त्तते ॥ वशिनार्च्च गृहस्थानां त्यासिनामप्ययं विधिः ॥ मेधाकामो हुनेदग्नौ पालाशैराज्यमिश्रितः ॥ समि
द्भिः पूर्ववत्ध्यात्वा मेधा स्याद्दतिमानुषी ॥ वाचमिच्छन्स्वभे घाचं बालेजप्तामहुनेत्के ॥ शतं शतञ्च वर्षमासं वाग्मी चापि सुधीर्भवेत् ॥ श
त्रूणां जयकामस्तु मारिजातहरं हरिं ॥ गरुडारोहनं ध्यात्वा जिताशेषदिवौकसं ॥ समिद्भिश्चापि जुहुयात्कारवीरसमुद्भवैः ॥ लक्षं
जप्त्वा तथा लक्षं जुहुयान्मन्त्रवित्तमः ॥ जित्वा शत्रुगणानेतानाक्रान्तश्च यथाविधि ॥ प्रतिष्ठाकारयेद्यस्तु भगवन्तं विचिन्त्य च
॥ शंखचक्रनिधियुक्तं वसन्तं द्वारकां पुरीं ॥ ध्यात्वा तिलाज्यकरवीराञ्जुहुयांसितनतण्डुलान् ॥ अष्टोत्तरसहस्रं वै प्रतिष्ठां लभते ध्रु
वं ॥ सर्वांल्लोकान्वशीकर्तुं कामयन्पङ्कजासने ॥ कदम्बमालया नित्यं भगवन्तमलंकृतं ॥ सनकाद्यैः प्रार्थमानं योगिभिर्गोपवेश
कं ॥ विचित्रपुष्पमालाभिर्भूषितं वनमालया ॥ कदम्बमूले गायन्तं चिन्तयेत्सर्वनायकं ॥ समिद्भिरप्यमोघैर्वरैरष्टोत्तरसहस्रकं ॥ म

ध्वाजप्त्वाते जुहुयात्स वै लोकवशीभवेत् ॥ मुमुक्षभिर्भगवन्तं पुण्डरीकदलेक्षणं ॥ सनकाद्यैश्चिन्त्यमानं सिद्धैरन्यैश्च योगिभिः ॥ ब्र
ह्मेन्द्रशंकरसुरैर्गणैश्चापि दिवौकसां ॥ प्रह्लादप्रमुखैर्भक्तैरन्यैश्चापि महात्मभिः ॥ हृत्पद्मकर्णिकोत्तुङ्ग दिव्यसिंहासनोपरि ॥ ध्या
त्वैवं परमात्मानं यशोदानन्दवर्द्धनं ॥ पलाशपत्रलसीयत्रैः सौवर्णकुसुमैः शुभैः ॥ मानसैर्वा यथाशक्त्या अर्च्चयेत्पुरुषोत्तमं ॥ आ
त्मानं देवकीपुत्रं लीलायष्टिधरं स्मरेत् ॥ यद्यत्कामयते मन्त्री तत्तदाप्नोत्ययत्नतः ॥ अनेन विधिना सर्वं साधयेत्परमात्मनः ॥
योजयेच्चतुर्थेन विष्णोश्चैव चक्रबुद्धिमान् ॥ तृतीयमस्य संविद्या ध्रुलग्नाविष्णुनासह ॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतन्त्रो
त्तमोत्तमे सप्तदशमोऽध्यायः ॥ ॥ अथापरान् प्रवक्ष्यामि प्रयोगानतिदुर्ल्लभान् ॥ यत्कृत्वा मानवः सम्यक्सद्यो देवत्वमृछ
ति ॥ नास्मात्परं विद्यते तत्त्वं भूवि स्वर्गे रसातले ॥ निशातशरनिर्भिन्नं भीमसन्तापहरं हरिं ॥ दक्षपीयूषवर्षीण्या कारुण्यपात्रं विलोकय
न् ॥ एवं ध्यात्वा त्रयुमजापादसाध्वज्वरनाशनं ॥ मूर्छादाहगदास्फोटविषमोदरसम्भवं ॥ नाशयेद्दाहमचिराद् अमन्तांशांशतोऽद्भु
तेन ॥ काशीराजेन प्रहितां कृत्यां तां द्वारकापुरीं ॥ निजारिण्ता तां छित्वा तत्पुरीं चक्रतेजसा ॥ दहन्तं तं हरिं स्मृत्वा जपेदयुतमाद्य

235

एत् ॥ स्वस्त्रेहात्तैः समर्थैश्च कुनेत्राग्नौ तथाहुतं ॥ कृत्याः परैरिता यास्तु न ग्रसन्ति कदाचन ॥ डाकिनीभूजनाकृत्यायक्षपन्नगराक्षसा
ः ॥ अन्यैवेक्रूरसत्वाश्च प्रयोगाज्यस्य होमय ॥ देशाद्देशान्तरं यान्ति न समर्थाश्च हिंसितुं ॥ ध्यात्वा विश्वेश्वरं देवं व्याप्तिविश्वावकाशकं
सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलं ॥ एवं ध्यात्वा च मतिमान् लक्षमेकं जपेन्मतं ॥ जुहुयाद्दशतं भक्त्या शतवीर्य्याङ्कुराज्ञिकैः
॥ दुर्वायस्य ख्यातिः ॥ आकाशमृत्युनाशाय मन्त्रमेतत्परं पदं ॥ मृत्युञ्जयहरिं ध्यात्वा सर्वपापैर्विमुच्यते ॥ आशीनमाश्रये दिव्ये व
टरिः षडण्मण्डिते ॥ स्पृशन् वृहत्स्यांहस्ताभ्यां घटाकर्णकलेवरं ॥ एवं ध्यात्वा जपेन्मासमष्टोत्तरसहस्रकं ॥ समस्तविपदां मं
त्रीप्रशमाय शमाय च ॥ समता सर्वभूतेषु आप्नुतिर्वीणादायकं ॥ निशीथे रथमारूढं नर्जयन्तं मुहुर्मुहुः ॥ धावमानं रिपुगणा
अनुधावनमच्युतं ॥ विसृजद्बाणसंघेन नयन्तं दूरमुच्यते ॥ उन्घातनं भवेत्सद्योरिपुणां लक्षजापतः ॥ द्वेषयन्तं हकिवलो
पाण्डियमध्यस्थितं हरिं ॥ ध्यात्वा लक्षं मनुवरं निस्वप्ने हरिविप्रितं ॥ तैलेनेत्यर्थः ॥ नदन्तं जुहुयान्मन्त्री गुलिकागोमयोद्भवाः ॥
एवं प्रयोगमात्रेण वैरस्यं जायते मिथः ॥ अन्योन्यकलहेनैव देशाद्देशान्तरं व्रजेत् ॥ विद्विष्टजनत्राणायिकाकवन्ध्यये टस्महीं ॥

पार्श्वे दिशन्तं गीतार्थं रथस्थं मधुसूदनं ॥ राजमण्डलमध्यस्थं चतुर्भुजं तमसमप्रभं ॥ ध्यात्वाप्रतं मनुवरं शमायप्रजयेत्सुधी ॥ अ
नेनजपमात्रेण किं नासिध्यति भूतले ॥ स्थाने हृषीकेश तवेत्यादि चार्ज्जुनवार्यकं ॥ गायत्री छन्दोवलितं विश्वामा विश्वदेवतं ॥
मयर्या पूर्ववन्न्यौ वेका साधयेत्सकलेप्सितं ॥ श्रीवीजाद्येज्जयेन्मंत्री वैरो ध्यात्वा च पूर्ववत् ॥ लक्षैकजपमात्रेण कुवेर इव मोदते
॥ अन्नदेवत गोपालं वक्ष्येऽन्नं शृणु तत्ततः ॥ अन्नरूपं रसरूपं तुष्टिरूपमदोपरि ॥ अन्नाधिपतये स्वाहा मोऽ[illegible]मन्नाधिपोम
न्त्रः ॥ श्रीवीजाद्यो मन्त्रः प्रोक्तोऽन्नरत्नसमृद्धिदः ॥ आचक्राद्यजं कृषिः स्यान्नारदोऽस्य मुनिः स्मृतः ॥ गायत्री छन्द इत्युक्तं देवश्चान्नप्र
दो हरिः ॥ ध्यानार्चेनादिकं सर्वमस्य पूर्ववदाचरेत् ॥ यद्वंचित्तयेन्मन्त्री सतु सर्वसमृद्धिमान् ॥ आहृत्य स्वर्णपात्रं च क्षालितं शु
द्धवारिणा ॥ विलिख्य गन्धपङ्केन लिखेदष्टदलाम्बुजं ॥ कर्णिकायां लिखेद्वह्निपुटितं मण्डलद्वयं ॥ द्विवह्निपुटितं षट्कोणमित्य
र्थः ॥ तन्मध्ये विलिखेन्नाम साध्यस्य कर्मसंयुतं ॥ ततः इष्टेमे नावयौं स्मरकामं वेष्टयेत्सुधीः ॥ श्रियं षट्कोणकोणानामन्तर्नेत्र
न वायुषु ॥ आलिखेच्च लिखेन्मायां वह्निवरुणभूमिषु ॥ अक्षरैः कामगायत्र्या वेष्टयेत्केशरेषु च ॥ मारमालामनो वैरौं दले

236

षट्कुमंत्रवित् ॥ लिखेद्गुहान्तरे वर्णौ मांतृकां तद्वहिर्लिखेत् ॥ अविस्वश्चलिखेद्वाह्ये श्रीमायेदिग्विदिक्षपि ॥ मन्त्रमेवं समालि
ख्यजातरूपमयेतटे ॥ राजते ताम्रपात्रे वा भूर्जे क्षौमसमये ऽपि वा ॥ सूक्ष्मतन्तुमये वापि प्रतिष्ठाप्य समीरणाः ॥ आकर्षणां सुरस्त्री
णां नागलोकविलासिनी ॥ पिशाचयक्षरक्षांसि क्रूरग्रहाश्च येस्थिता ॥ दुष्टसत्वाश्च येसर्वे यरिसर्पन्ति भूतले ॥ यन्त्रराजधरं दृष्ट्वा
विद्रवन्ति द्रमन्ति च ॥ वहुनाकिमिहोक्तेन सर्वलोकसुखावहं ॥ स्त्रीणामाकर्षणां राज्ञां लोकवश्यकरं अवि ॥ योगसिद्धिकरं पुंसां भ
वसागरतारकं ॥ भुक्तिमुक्तिकरं यंत्रमिति प्रोक्तं स्वयम्भुवा ॥ वान्तं यान्तं समारूढं मायाविन्दुविभूषितं ॥ श्रियावीजमिति प्रोक्तं न्द्र
णां सर्वसुखप्रदं ॥ आदौ क्लीङ्कारमुच्चार्य कामदेवपदं वदेत् ॥ आयान्ते विद्महे पुष्पवाणायेति पदन्तथा ॥ धीमहीति पदं प्रो
क्तात्तन्नो ऽनङ्गः प्रचोदयात् ॥ एषा मन्मथगायत्री प्रोक्ता मन्मथदीपनी ॥ कामं नाडीञ्च संभाव्य ततः काममदं वदेत् ॥ देवयेति पदं उ
क्त्यात्तथा सर्वजनं पदं ॥ प्रियायेति पदान्ते च वदेत्सर्वजनं पुनः ॥ क्रुयात्सम्मोहनायेति ज्वलशब्दञ्च वीप्सयेत् ॥ प्रज्वलेति पदं स
र्वजनस्य हृदयन्तथा ॥ उत्मामसमवशं पश्चात्कुरु शब्दञ्च वीप्सयेत् ॥ वह्निजायां तथैतस्या मालाख्या मन्मथो मनुः ॥ भूष्टहं चतुर

गौतमी
९०

संस्पादस्ववज्रविभूषितं ॥ अस्मिन्मन्त्रे समावाप्य वासुदेवजगद्गुरुं ॥ किं न सिध्यति मन्त्रज्ञो यत्कथ्यं कथितं च ते ॥ एवं ते कथि
तं मन्त्रं प्रयोगान्तमिहोच्यते ॥ लक्षं जप्त्वा पलाशानां कुसुमैस्तन्समं हुनेत् ॥ व्याख्याता सर्वशास्त्राणां अचिरादेव जायते ॥ संयोगी
स च विज्ञानी विष्णुयोगी तथात्मवित् ॥ शुक्लवस्त्रस्य लाभाय शुक्लादिपुष्पमाहुनेत् ॥ अष्टोत्तरशतं कृत्वा राजतो वास्मृतो लभेत्
॥ मुच्यते यो पितरौ कृत्स्नं मथुरा निर्द्देनार्द्दितो ॥ ध्यात्वायुतजपान्ते च तावत्संख्यं च होमयेत् ॥ निगडान्मुच्यते सद्यो यमुद्दिश्य कृता
क्रिया ॥ पुरन्दरमुखैर्देवैः स्थितं वृन्दावनं हरिं ॥ सुरभ्याः पयसा तोयै राभिषिच्य च संस्तुतं ॥ राजराजेश्वरं कृत्वा मङ्गलाचारपू
र्वकं ॥ उर्वशीप्रमुखाभिस्तु स्वर्वेश्याभिः रधिष्ठितं ॥ एवं ध्यात्वा जपेल्लक्षं पङ्कजैरयुतं हुनेत् ॥ सार्वभौमो भवेत्सोऽपि येनत्यं विहि
ता क्रिया ॥ आत्मानं कृष्णमथ नं रिपुकं साध्यकं स्मरन् ॥ निशीथे प्रजपेन्मन्त्री दक्षिणामुखसंस्थितः ॥ लक्षमेकं जपान्ते तु वानीरत
रुतर्पणैः ॥ अयुतं होममात्रेण म्रियतेऽरिर्नेत्वान्यथा ॥ अरिष्टपत्रलक्षान्तं पादपांशुनरेक्षितं ॥ हरणाम्रियते शत्रुः शङ्करेणा
पि रक्षितः ॥ अरिष्टदलकार्पासवीमास्थिकणं संयुतं ॥ हरणालक्षमात्रेण यदि भूरक्षितो भवेत् ॥ अपि पीयूषपसेवी च म्रिय

237

तंत्र
९०

तेऽरिनैश्चान्यथा ॥ हरिद्राग्रन्थिहोमेन स्तम्भयेदरिवाहिनीं ॥ न शान्तं मारणं कर्म्म कदाचिद्वैष्णवे समो ॥ क्रूरं क्रूराशयं कस्मा-
यिनस्त्वसतामपि ॥ इत्थं विधं जनं प्राप्य अभिचारान्प्रयोजयेत् ॥ प्रायश्चित्ताय गायत्रीं लक्षं जप्त्वा च साधकः ॥ तदन्ते गायत्रैर्म-
न्त्रैरयुतं होममाचरेत् ॥ अपि प्रयोगकर्त्तॄणां शान्तिः स्यान्नैव चान्यथा ॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतन्त्रोत्तमोत्तमेऽ-
ष्टादशोऽध्यायः ॥ ॥ कर्म्मान्तरमथो वक्ष्ये शृणुष्वावहितोऽनघ ॥ यत्कृत्वा मन्दभाग्योऽपि लभेन्मन्त्रफलानि वै ॥ प्रणव-
द्वयमध्यस्थं जपेदयुतसंख्यया ॥ त्रिरात्रजपमात्रेण बृहस्पतिसमो भवेत् ॥ व्याख्याता सर्वशास्त्राणां वेदानामपि जायते ॥ शनि-
वारेऽश्वत्थवृक्षमालभ्याष्टोत्तरं शतं ॥ भूयो भूयो भवेच्छान्तिर्जीवेदष्टोत्तरं शतं ॥ न स्याच्छान्तिर्भवेन्नूनं यमुद्दिश्य कृता क्रिया ॥
अर्काङ्केऽर्च्चयेत्कृष्णं मासमात्रं तु निर्म्मलैः ॥ मुच्यते मलिनैः कृच्छ्रैः पापैर्घोरतरैरपि ॥ पट्टवस्त्रैर्यजेद्यस्तु संपत्तिमतुलां भवेत् ॥
विद्रुमैः पूजयन्कृष्णं त्रैलोक्यं वशमानयेत् ॥ माणिक्यैः पूजयन्भक्त्या सार्वभौमसमो भवेत् ॥ यस्तु रागैर्यजेत्कृष्णं राजा भवति
निश्चयं ॥ क्षत्रियः सार्वभौमः स्यात्साधयेत्सकलां महीं ॥ गारुत्मतमयै रत्नैः पूजयन्ज्ञानवान्भवेत् ॥ अपि हीरकरत्नेन पूजयन्

गौतमी· किंधनमाधयेत् ॥ सुवर्णपुष्पैरभ्यर्च्य मासमभक्तिपरायणः ॥ कुवेरसमसम्पत्तिं संप्राप्य मोदते चिरं ॥ देहान्ते हरितां प्राप्य निर्वाण
६१ पदमृच्छति ॥ रविवारेऽर्कपुष्पैश्च कह्लारैः सोमवारके ॥ मङ्गले रक्तपुष्पैश्च बुधे तगरसम्भवैः ॥ चम्पकैर्गुरुवारे तु शुक्रे सुकुन्द
सम्भवैः ॥ शनिवारे शमीपुष्पैः पूजयेच्छक्तितो यतिः ॥ रविवारे घृतान्नन्तं पयोऽभ्यक्तं निवेदयेत् ॥ सोमवारे पिष्टकादि सितया सह
योजयेत् ॥ मङ्गले गुडसंमिश्रं अन्नं वहुगुणान्वितं ॥ बुधवारे चावकन्तु गुरवे यूपसम्भवैः ॥ दुग्धान्नं शुक्रवारे तु सनौ सघृत-
पायसं ॥ वैशाखे मासि विधिवत्तर्पयेद्द्रुमवज्वलैः ॥ ज्येष्ठमासि प्रयत्नेन फलैः संपूजयेद्धरिं ॥ आषाढे मासि विधिवन्पवित्रैः पूजये
238 द्धिजं ॥ एकैकस्वर्णसूत्राणि ग्रथिस्रक्कानि कारयेत् ॥ अथवा पट्टसूत्राणि पञ्चसूत्राणि वा पुनः ॥ पूजान्ते देवदेवाय महिषीभ्यो निवे
दयेत् ॥ मिथुनेऽभ्यन तथा दत्वा महान्तमुत्सवं चरेत् ॥ तापयेऽन्नक्षभोज्यैस्तु ब्राह्मणान्संशितव्रतान् ॥ एवं सम्वत्सरे मंत्री कृत्वा भीरुस तंत्र
वाप्नुयात् ॥ न चेद्वर्षकृता पूजा वार्स्ताभक्षाय कल्पते ॥ श्रावणे मासि कृष्णं तं पूजयेत्केतकोद्भवैः ॥ चन्द्रचन्दनकस्तूरीकुंकुमादिसुवा ६१
सितैः ॥ एलालवङ्गकक्कोलफलानि वहुधार्पयेत् ॥ भाद्रे मासि यजेत्कृष्णं भक्ष्यैर्वहुगुणान्वितैः ॥ इषे मासि यजेद्भक्त्या भक्ष्यैर्भोज्यैः सुवि-

स्तरैः॥ कार्यामानिर्म्मितैर्वस्त्रैर्नानाभरणसंयुतैः॥ जलस्थे भास्करे कृष्णं पूजयेन्मासमात्रकम्॥ रात्रौ प्रदीपे होमे
॥ घृतदीपपरिच्छिन्नदद्यान्मासं महोज्वलं॥ एकादश्यामुपोष्यैव द्वादश्यां पारणादिने॥ सुस्नाया विष्णुमभ्यर्च्च वस्त्रलङ्करणादिभि
ः॥ अस्पानिन्थौ च मतिमान् वर्षेतोन्स्वमाचरेत्॥ भोज्यानि बहुभक्ष्याणि ब्राह्मणेभ्यो निवेदयेत्॥ एवं कृते देवतास्य तुष्टाश्चैव प्र
यच्छति॥ सर्वलोकमवाप्नोति पुनरावृत्तिवर्जितः॥ मार्गशीर्षे यजेद्देवं नवान्नव्यञ्जनैः शुभैः॥ नारिकेलफलक्षोदमिश्रितं गुडजी
रकैः॥ स्त्रह्यघ्नं च देवाय भक्त्या तस्मै निवेदयेत्॥ पौषमासि च मासं वै पूतपूपैः प्रपूजयेत्॥ माघमासि यजेत्कृष्णमक्षतैः सुशुभै
स्तितैः॥ दुग्धार्थशर्करायुक्तमिष्टान्नश्च निवेदयेत्॥ अस्मिन्मासि शुभदिने वस्त्रेणाच्छादयेद्विभुं॥ फाल्गुणे देवकीपुत्रं पूजयेत्स्व
र्णपुष्पकैः॥ चूतसौगन्धिकुसुमैर्धूपैर्दीपैः सुविस्तरैः॥ चैत्रमासि वासुदेवं सर्वपुष्पैः समर्च्चयेत्॥ पौर्णमास्यां यजेज्जन्त्या मदनै
श्च सगुडकैः॥ अस्मिन्दिने रतिं कामं पूजयेद्भक्तितः परं॥ न चेत्साम्बत्सरी पूजा वृथा भवति निश्चितं॥ भस्मीभूतं स्मरं दृष्ट्वा हृदि
तासा रतिः सती॥ तां दृष्ट्वा कृपया विष्णुर्वरं सा तु स्वयं शिवः॥ अनुवाचरतिः स्त्रियं सुभगत्वमवाप्नुयात्॥ सुन्दरः सर्वलोके भुक्त्री

गौतमी॰
६२

नार्थं व्रजसुन्दरि ॥ ततोऽभवन्नन्दनवनात्पुष्पं मदनकं शुभं ॥ तेन पूजनमात्रेण सम्यक्सत्र् फलं लभेत् ॥ होमयेद्यस्य मात्रं यः पि
ष्टकैर्घृतनिर्जितैः ॥ तावत्संख्यं मन्त्रं जप्त्वा कृत्स्नं पश्यति मन्त्रवित् ॥ इति ते कथितं सम्यक् पूजनं वार्षिकोऽन्दैवैः ॥ कृत्वा तेन विधाने
नकिं न सा ध्याति भूतले ॥ शूद्रापि स्त्रियो गृहस्थाश्च मुनयो ब्रह्मचारिणः ॥ वनस्थाश्च तथा कृत्वा वाञ्छितं प्राप्नुयुः क्षणात् ॥ स्त्रियः
शूद्राश्च विधिवत्कृत्वा लक्षमवाप्नुयुः ॥ इह भुक्त्वा वरान्भोगान् न भूयो भवसन्तवः ॥ एवं कृष्णं यजन्भक्त्या यत्कृतं जन्मकोटिभिः
तत्पापैर्नैर्विलिप्येत पद्मपत्रमिवाम्भसा ॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतन्त्रोत्तमोत्तमे ऊनविंशोऽध्यायः ॥ ॥

239.

गौतम उवाच ॥ विस्तरेण मम ब्रह्मन् कृष्णमन्त्रान् ब्रवीहि मां ॥ भक्तोऽहं तव शिष्योऽहं योग्योऽस्मि श्रवणे गुरो ॥ नारद उवाच
शृणु ब्रह्मन् कृष्णमन्त्रान् सर्ववेदैकसम्मतान् ॥ यदेकज्ञानमात्रेण पुनर्जन्म न विद्यते ॥ अवर्णपूर्वमुद्धृत्य नमस्तदनु चोच्चरेत् तंत्र
॥ कोऽनुमायेति संप्रोक्तो मन्त्रराजाक्षरः परः ॥ एतद्विज्ञानमात्रेण साक्षाद्विष्णुर्भवेद्यतिः ॥ षड्दीर्घस्वरसंभिन्नकामेनाङ्गक्रियाम ६२
ता ॥ कलायकुसुमश्यामं शङ्खचक्रगदाम्बुजं ॥ अनेकरत्नसंछन्नं कौस्तुभोद्भासिवक्षसं ॥ तारहारावलीरम्यं गरुडोपरिसंस्थितं ॥ ध्या

त्वैवंपरमानन्दं दशलक्षं जपेन्मनुं ॥ होमयेत्तद्दशांशेन साधितैर्युग्मपायसैः ॥ पुरश्चरणमङ्गं यच्छेशामन्यान्तमापयेत् ॥ एवंभ
जते मंत्री भोगमोक्षैककारणं ॥ करप्रचेयासर्वो[illegible] अनेनत्परमंत्रजेत् ॥ दशाक्षरसमानं हि पूजनं समुदीरितं ॥ अथातस्संप्रव
क्ष्यामि षडवर्णमंत्रराजकं ॥ यस्य विज्ञानमात्रेणजीवन्मुक्तो महीश्वरेत् ॥ त्रिमात्रं नमसायुक्तं चतुर्थ्यो कृष्णइत्यपि ॥ षडक्षरम
नुः प्रोक्तो दृष्टादृष्टफलप्रदः ॥ नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द उच्यते ॥ कृष्णोऽपि देवता साक्षादुर्गाधिष्ठानु देवता ॥ त्रिमात्रं
बीजमित्युक्तं नमः शक्तिरुदीरिता ॥ कृष्णायकीलकञ्चास्य मंत्रराजस्य कीर्त्तितं ॥ विनियोगोऽस्य मंत्रस्य पुरुषार्थचतुष्टये ॥ मन्त्राज
निमनोरस्य आचक्राद्येहृदीर्यते ॥ नीलजीमूतसंकाशं किंकिणीजालमालिनं ॥ सर्वाभरणसंदीप्तं रक्तपद्मोपरिस्थितं ॥ सनकाद्यै
र्मुनिवरैः स्तुतं ध्यायेद्दिगम्बरं ॥ आलोलकुरुलोज्जासिमुखचन्द्रविराजितं ॥ शारक्ताधरं रक्तपाणिपादविराजितं ॥ कराभ्यां पाय
संभक्षं सव्याहे यज्ञवीयकं ॥ दर्पणं चिन्तयेद्देवं भोगमोक्षफलप्रदं ॥ ध्यात्वैवं परमात्मानं दशलक्षं जपेन्मनुं ॥ जयान्ते पायसैः शु
द्धैर्होमं कुर्य्यात्सशर्करैः ॥ तर्पयेत्तद्दशांशेन जलैः कर्पूरवासितैः ॥ अभिषेकं दशांशेन दशांशैर्विप्रभोजनं ॥ तदन्ते दक्षिणां दत्वास

240

ध्येयेद्दिनमात्मनः ॥ भिक्षाहारो जपेन्मंत्रं वर्षमेकं तु तेस्थितः ॥ कविर्वाग्मी समृद्धश्च सर्वज्ञो जायते ध्रुवं ॥ नवनीताशनं देवं ध्या
त्वा लक्षं जपात्सुधीः ॥ दिव्यज्ञानमवाप्नोति त्रिलोकीं प्राप्य मोदते ॥ य एवं मन्त्रराजं तु भजते भक्तितत्परः ॥ इह भुक्त्वा वरान् भोगान्
देहान्ते परमं विशेत् ॥ अथापरं प्रवक्ष्यामि षोडशार्णं महामनुं ॥ यस्य विज्ञानमात्रेण कृष्णात्म परमं विशेत् ॥ प्रणवं मनसायु
क्तं कृष्ण गोविन्दकौ तथा ॥ श्रीपूर्वे उत्तमं चान्ते चतुर्थ्यन्तं स्वाहेति कीर्तितः ॥ नारदोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतं ॥ परमात्मा
हरिर्देवो भुक्तिमुक्तिफलप्रदः ॥ दशार्णोक्तवदेवास्य जपहोमौ प्रकीर्तितौ ॥ प्रयोगस्तत्समः प्रोक्तो वीजशक्तिच तत्समे ॥ य एनं चि
न्तयेन्मंत्रं सोऽधीते श्रुतिचतुष्टयं ॥ अनेन सदृशो मंत्रो जगत्स्वपि न विद्यते ॥ अनेनाराधितः कृष्णः प्रसीदत्येव तत्क्षणात् ॥ अ
थ सन्तानसंसिद्ध्यै वालदं यन्त्रनायकं ॥ यस्य विज्ञानमात्रेण मंत्राः सिध्यन्ति मन्त्रिणः ॥ देवकीपुत्रशब्दान्ते गोविन्दपदमीरयेत् तंत्र
वासुदेवपदान्ते तु ततो ब्रूयाज्जगत्पते ॥ देहि मे तनयं देव त्वामहं पदमीरयेत् ॥ परणं गत इत्युक्त्वा मनुश्चानुष्टुभात्मकः ॥ ना ६३
रदोऽस्य ऋषिश्छन्दो गायत्री वाथितं बुधैः ॥ सन्तानदो हरिः साक्षाद्देवता च प्रकीर्तिता ॥ व्यनैः समस्तैरङ्गानि कृत्वा देवं विचिन्त

येत्॥ नीलोत्पलदलश्यामं पीताम्बरयुगावृतं॥ चतुर्भुजं शंखचक्रमूर्द्धपाणिद्वयोस्थितं॥ अधःपाणिद्वयेवेणुं वादयन्तं मुदान्वि
तं॥ अनेकरत्नसन्नद्धकिरीटोज्ज्वलविग्रहः॥ नानालङ्कारसुभगं गरुडोपरिसंस्थितं॥ वेदस्तोत्रं पठन्नित्यं मुनिभिः परिवेष्टि
तं॥ एवंध्यात्वार्च्चयेत्कृष्णं यश्चाङ्गः परमावृतिः॥ इन्द्रादिभिर्द्वितीयास्यात्तृतीयात्तु तदायुधैः॥ एवमभ्यर्च्य देवेशं लक्षमात्रं जपे
न्मनुं॥ पुत्रजीवेन्धनाचिन्ने तत्फलैरयुतं हुनेत्॥ अनन्तरं दशांशेन तर्पणादीनि चाचरेत्॥ यएनं प्रभजेन्मंत्री सन्तानार्थं महा
मनुं॥ पुत्रपौत्रैर्विनश्यत देहान्ते परमं व्रजेत्॥ अविच्छिन्नं भवेद्वंशं यावदाहुतसंप्लवं॥ दशम्यां शुक्लपक्षेतु निशीथे स्वस्तिमं
डले॥ हरिमावाह्य विधिवत्पूजयेदुपचारकैः॥ एवमर्चनमात्रेण वत्सरान्पुत्रवान् गृही॥ दीर्घायुरप्रतिहतबलवीर्यसमन्वि
तं॥ वत्सरात्सभते पुत्रं सत्यं सत्यं मयोदितं॥ यस्यार्थे कुरुते मंत्री प्रयोगं स तु पुत्रवान्॥ कन्यापि लभते पुत्रान् शतहायनजी
विनान्॥ प्रातर्वाचंयमा नारी वाधिकुम्भदले जलं॥ मंत्रयित्वाष्टोत्तरशतं पिबेत्सुत्रीयति ध्रुवं॥ एवं प्रयोगमाश्रमेत्तनयं लभते ध्रु
वं॥ अनेन मंत्रितं त्वाज्यं पुत्रसिद्धिकरं परं॥ अनेन जलपानेन वंध्यापवर्गोल्लभेत्प्रजां॥ ॥ इति श्रीगौतमीयमहातन्त्रे सर्वतन्त्रो

गौतमी· नमोत्तमेविंशोऽध्यायः॥ ॥गौतमउवाच॥ सर्वंजानासित्वंविद्वन्स्वयंभुसदृशंप्रभो॥ त्वदुदीरितमाकर्ण्यकृतार्थोऽहंन
६४ चान्यथा॥ तपस्त्वाप्रागबुभुत्सन्प्रार्थितोहरिमीश्वरं॥ तेनैवोक्तंनवेदेनकथितव्यमखण्डितः॥ तदारभ्यप्रागबुभुत्सन्नतवदर्श
नलालसः॥ गङ्गाप्रवाहणांमन्त्रंश्रोतुमिच्छामितत्त्वतः॥ नारदउवाच॥ वहवःकथितामन्त्रामयातेमुनिसत्तम॥ तन्मन्त्रंकथया
म्ययेनज्ञानंप्रसीदति॥ यस्यविज्ञानमात्रेणभक्तिःस्यात्त्रिमलक्षणा॥ चतुर्विधश्चपाण्डित्यंज्ञानमात्रेणसिध्यति॥ मन्दभागो
दरिद्रोऽपिशठोमूढोऽतिपातकी॥ उपास्यमन्त्रराजन्तुवागीशसमतांव्रजेत्॥ मयाप्येवंपुरापृष्टःपद्मयोनिर्मथावदेत्॥ तथा
तेकथयिष्यामिशुश्रूषुर्यतवंमुने॥ द्वाविंशत्यक्षरोमन्त्रोवागीशत्वप्रवर्तकः॥ सर्वतन्त्रेषुगुप्तोऽयंगोपनीयस्त्वयामुने॥ वेद

:प्रादुरभूदस्यमन्त्रेणानेनवेधसः॥ कवीन्द्रत्वंभार्गवश्चवागीशत्वंवृहस्पतिः॥ प्रियामिन्द्रादयोदेवाज्ञानञ्चसनकादयः॥ सौ तंत्र·
भाग्यंचन्द्रमाःप्रापकुवेरोऽपिधनेशतां॥ इमंमन्त्रवरंज्ञात्वासर्वेशोभवतिध्रुवं॥ अहंस्याश्रुतशास्त्रस्यव्याख्याताशिष्यगोभवे ६४
त्॥ महाकविर्महाप्राज्ञोवाक्पतेःसमतांव्रजेत्॥ ज्ञानन्तुपरमंलब्ध्वाविष्णोःसायुज्यतांव्रजेत्॥ यंयंकाममभिध्यायन्मनुष्याभज

तेमन्त्रं ॥ तं तं काममवाप्नोति भुवि स्वर्गे रसातले ॥ अस्योद्धारम् अहं वक्ष्ये मनमसर्वज्ञकारणः ॥ कृष्णगोविन्दवौ ङेन्तौ तथा गोपीजनां
ततः ॥ वल्लभोऽग्निप्रियासर्गी हृपूर्वः समनुस्वरः ॥ नाम्ना मादौ कमान्यामनसा या लक्ष्मीर्नियोजयेत् ॥ द्वाविंशत्यक्षरो मन्त्रो वाग्भवा
द्यः प्रकीर्तितः ॥ अहमस्य मुनिश्छन्दो गायत्री देवता मनोः ॥ गङ्गाप्रवाहणो नाम कीर्त्यते परमार्थतः ॥ वीजन्तु मान्मथं प्रोक्तं शक्तिः पत्नी
हविर्भुजः ॥ कृष्णाय कामबीजाभ्यां हृदयं परिकीर्तितं ॥ गोविन्दाय शिरस्तद्वन्मायायोऽसौ महामनुः ॥ गोपीजनशिखा तद्वत् श्रीवीर
जायेन विन्यसेत् ॥ वल्लभायेति कवचं अस्त्रं जायां हविर्भुजः ॥ शेषवीजेन संहिताः पञ्चमनवः स्मृताः ॥ मूर्द्धि भाले भ्रुवोर्मध्ये नेत्रक
र्णौ तथा नसि ॥ आस्ये कण्ठे च दोर्मूले हृदयोदर नाभिषु ॥ लिङ्गमूले तथाधारे ऊर्वोर्जान्वोश्च गुल्फयोः ॥ समस्तेन च मन्त्रेण व्यापकं
न्यस्य चिन्तयेत् ॥ कलायकुसुमश्यामं पूर्णचन्द्रनिभाननं ॥ वर्हिवर्हकृतोत्तंसं वनमालिनमीश्वरं ॥ किरीटहारकेयूररत्नकुण्डल
मण्डितं ॥ श्रीवत्सवक्षःसंभ्राजत्कौस्तुभोद्भासितोरसं ॥ भवती वेशला वण्यमनीयतनुं हरिं ॥ दिव्यपीताम्बरधरं चारुहारविभूषितं
स्मेरारुणाधरन्यस्तवेणुं त्रैलोक्यमोहनम् ॥ ऊर्द्ध्वं वेदमयं वेणुं वादयन्तं चतुर्भुजं ॥ स्फाटिकीमक्षमालाञ्च विद्यामूर्द्धकरद्वये ॥ दध

नं पुण्डरीकाक्षं दिव्यगानपरायणं ॥ अतुल्यानल्पसौदर्य्यं मोहयन्तं जगत्रयं ॥ तपनीयलसत्कान्त्या वीणाकमलहस्तया ॥ निरीक्ष
माणं चरन्वामपार्श्वस्थया श्रिया ॥ हेमसिंहासने रम्ये सर्वरत्नोपशोभिते ॥ हकिन्नरगणादिमहर्षीतिनिषेवितमनारतं ॥ चन्द्रमण्
डलसंकाशश्वेतछत्रोपशोभितं ॥ नारदाद्यैर्मुनिगणैर्ज्ञानातिथिरुपासितं ॥ इन्द्रादिदेवतावृन्दैः प्रणतं परमेश्वरं ॥ सर्वज्ञं जगदी
शानं ध्यात्वा हृदयपङ्कजे ॥ जपेदेवं मन्त्रवरं ध्यात्वा लक्षचतुष्टयं ॥ स्वादुरक्तैः कुसुमैर्बिल्ववृक्षजैर्होममाचरेत् ॥ दशांशेन च म
न्त्रोऽयं सिद्धो भवति नान्यथा ॥ पूजा दशाक्षरे पीठे अङ्गावृतिरनन्तरं ॥ महिषाभाद्वितीयापि तृतीयापि गधीश्वरैः ॥ चतुर्थी न सुह
रैश्चतुराणवृत्तिरीरिता ॥ प्रातःप्रातः पिबेत्तोयं मन्त्रेणानेन मन्त्रितं ॥ वागीश्वरसमोऽयं ता काव्यकर्ता महान्भवेत् ॥ अनेन मन्त्रितं नि
त्यं ब्रह्मामात्रं प्ररक्षयेत् ॥ मण्डलादर्वमतिमान्महाकान्तिधरो भवेत् ॥ वाक्षीकुष्ठवचाकल्पघृते नाद्विगुणोन च ॥ चतुर्गुणाभ
वेदुग्धयाचितं घृतस्तनमं ॥ अवनाश्यं जपेदष्टअयुतं जपमादरात् ॥ वर्षमेकं प्रातरेव भक्षयेन्मौनमास्थितः ॥ एतत्सक्षणमा
त्रेणा बृहस्पतिसमो भवेत् ॥ हस्तमात्रेण्यजिह्वायां जपेदयुतमादरात् ॥ प्रतिभा जायते दिव्या सर्वलोकैकभाविना ॥ धवले रूपचा

रैस्तु यदि देवं प्रपूजयेत् ॥ दिव्यज्ञानमवाप्नोति प्रतिभा विश्वजित्वरी ॥ श्रीविद्यायां यदा जप्त्वा तदा लक्ष्मीर् अचञ्चला ॥ कामाद्यं ज
पनादेव सर्वलोकवशं नयेत् ॥ मायादिजपनादेव वाक्सिद्धिर् जायतेऽचिरात् ॥ शक्तिबीजादिको मंत्रो निर्वाणमचिराद्दिशेत् ॥
पूटनात्स्मरणाद्वाभ्यासान्मोक्षमाप्नोति निश्चितं ॥ एवं मन्त्रवरं जप्त्वा किं न सिध्यति मंत्रवित् ॥ एवं मन्त्रवरं यस्तु भजते भक्तितत्परः
इहमुक्त्वा वरान् भोगान् समलक्ष्मीसंयुतान् ॥ सम्प्राप्य परमालब्धा मृषादन्ते परं पदं ॥ कामेन्द्राद्या पराशक्तिर्नादबिन्दुसम
न्विता ॥ कथितः कृष्णमंत्रोयं मंत्राणां मंत्रनायकः ॥ ऋषिर्ब्रह्मा समाख्यातो विराट्छन्द उदीरितः ॥ त्रैलोक्यमोहनो देव श्रीकृष्णः प
रिकीर्तितः ॥ कलषड्दीर्घबीजेन षडङ्ग परिकीर्तितः ॥ अंशालम्बितवामकुण्डलधरं मन्दोल सत्कुन्तलं ॥ किञ्चित्काञ्चितको
मलाधरपुटं साचिप्रभावेक्षणं ॥ आलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा ॥ मूले कल्पतरोस्त्रिभङ्गललितं ध्यायेज्जगन्मो
हनं ॥ एवं ध्यात्वा जपेन्मंत्रं अष्टादशलक्षकं ॥ तद्दशांशेन जुहुयात्पायसैरथ वाम्बुजैः ॥ दशाक्षरोदिते पीठे पूजयेत्तु विधानतः ॥ प्र
योगानपि सर्वत्र तदुक्तेनापि कारयेत् ॥ अथवा बालकृष्णञ्च नीलेन्दीवरसन्निभं ॥ रत्नाभरणसंदीप्तं द्विभुजं नीलकुन्तलं ॥ पायस

नवनीतस्य कराभ्यां दधतं स्मरेत् ॥ लक्षमेकं जपेन्मंत्रं पायसैर्होमयेत् शुभैः ॥ दशांशं विधिवद्भक्त्या पूजाङ्गैः तर्पणादिकाश्च तैः ॥ होम

येदयुतं मंत्री घृतभाज्जितयिष्टकैः ॥ अलक्ष्मिर्नश्यति क्षिप्रं कान्तितेजश्च विन्दति ॥ पलाशकुसुमैर्हुत्वा वाक्सिद्धिं लभते ध्रुवं ॥

पङ्कजैर्जुहुयान्मंत्री अयुतां श्रियमाप्नुयात् ॥ नवनीतस्य होमेन कविर्वाग्मी प्रजायते ॥ वासुदेवपदं चोक्त्वा निगडाच्छेदनाय च ॥ वा

सुदेवद्वयं चोक्त्वा स्वाहेति तन्मनुर्मतः ॥ नारदोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतं ॥ निगडच्छेदनो लक्ष्मीर्वासुदेवोऽस्य देवता

॥ पञ्चाङ्गानि मनोरस्य आचक्राद्येन कल्पयेत् ॥ राजमण्डलमध्ये तु कंसातियामहेलया ॥ ज्ञानीतां वर्द्धयन् हर्षं आनीय पितरौ स्व

यं ॥ निगडान्मोचितौ भक्त्या प्रणाम्य च पुनः पुनः ॥ वाक्ष्ये संख्याप्य विधिवद्देवकीवीक्षितै नृपैः ॥ एवं ध्यात्वा जपेल्लक्षं जुहुयात्तद्दशां

शतः ॥ अङ्गन्यासादिकं सर्वं तदग्रवदनादितं ॥ य एवं चिन्तयेन्मंत्री समलस्यकसमपदां निधिः ॥ राजदुर्गभयादिभ्यो मुच्यते स्मरणा

त्क्षणात् ॥ त्रिगुडासमूलहोमेन मुच्यते बन्धनादिभिः ॥ राजद्वारे भये घोरे स्मरणान्मुच्यते भयात् ॥ ॥ इति श्रीगौतमीये महा

तन्त्रे सर्वतन्त्रोत्तमोत्तमे एकविंशोऽध्यायः ॥ ॥ गोपालंपिबाऽसंज्ञं च कथयामि मुने शृणु ॥ यदाकर्णपुरोर्भक्त्या परंब्रह्म च मे

243

दते ॥ अनेन सदृशो मंत्रो जगत्स्वपि न विद्यते ॥ पश्चान्नाभो धरासंस्थः सबिन्दुकमनुस्वरं ॥ कथितो मंत्रराजोऽयं भुक्तिमुक्तिफलप्र
दः ॥ ऋषिर्ब्रह्मास्य गायत्री छन्दः श्रीकृष्ण देवता ॥ गलाभ्यां वीजशक्तिस्तु कीलकं शेषमुच्यते ॥ षड्दीर्घवीजेन षडङ्गानि प्रकल्प
येत् ॥ वृन्दावनगतं कृष्णं रत्नसिंहासनस्थितं ॥ कदम्बमूलदेशे तु गोपिकाजनवेष्टितं ॥ नारदाद्यैमुनिवरे दिव्यगानावसन्वकैः
॥ सहितं परया भक्त्या वनमालीनमीश्वरं ॥ रत्नालङ्कारसस्दिग्नं शंखचक्रलसत्करं ॥ शब्दब्रह्ममयं वेणुमधः पाणिद्वयेरितं ॥ ए
वं ध्यात्वा मनुवरं लक्षमात्रं जपेद्वशी ॥ त्रिमान्वितैः पायसैस्तु युतं होमं समाचरेत् ॥ य एनं भजते मंत्री सिद्धये तस्य हस्तगाः ॥ ध
वलैः कुसुमैर्होमाद्वाक् सिद्धिं लभतेऽचिरात् ॥ कर्णिकारस्य होमेन लक्ष्मीः सर्वविधा भवेत् ॥ अनेन मन्त्रितं तोयं प्रातः प्रातः पिबे
ज्वलं ॥ कविर्वाग्मी श्रुतिधरः सर्वज्ञो जायतेऽचिरात् ॥ अस्योपासनमात्रेण किं न सिध्यति मंत्रिणः ॥ इह भुक्त्वा वरान् भोगान् पु
त्रपौत्रैः समन्वितः ॥ अन्ते तत्परमं धाम मंत्री याति निरामयं ॥ अथ वक्ष्ये महामन्त्रं सर्वेप्सितफलप्रदं ॥ यस्य धारणमात्रेण किं
न सिध्यति भूतले ॥ बीजं त्रिकोणमालिख्य षट्कोणं तद्बहिर्लिखेत् ॥ षडक्षरं लिखेत्तत्र वृत्तस्याष्टदलं लिखेत् ॥ अष्टाक्षरे

णासंयुक्तं तद्वहिः षोडशच्छदं ॥ षोडशार्णैः कृष्णमन्त्रं वहिर्द्वादशदलान्वितं ॥ द्वादशाक्षरेणासंयुक्तं अष्टादशदलन्ततः ॥ अष्टाद
शार्णं तन्मध्ये वहिर्द्वात्रिंशदम्बुजं ॥ देवकीसुत इत्यादि तत्रैव वृत्तमालिखेत् ॥ पिण्डबीजं वेष्टकत्वेन यंत्रस्य च सर्वतः ॥ तद्वहि
र्वृत्तं निव्याघमातृका तत्र वेष्टयेत् ॥ वृत्तद्वयं पुनः कृत्वा शापांकुशेन वेष्टयेत् ॥ तद्वहिर्वृत्तमेकन्तु चतुरस्रं सवज्रकं ॥ एतदुक्तं
महायंत्रं कृपया मुनिसत्तम ॥ सुवर्णपत्रे भूर्जे वा नित्यं यः सुसमाहितः ॥ अष्टगन्धैर्म्मसीं कृत्वा लिखेत्स्वर्णशलाकया ॥ अस्य धा
रणमात्रेण साक्षाद्भूमिपुरन्दरः ॥ मुच्यते मालिनेकृच्छ्रदुःखैर्घोरैर्नरैरपि ॥ शान्तिश्च शाश्वतीं लब्ध्वा याति तत्परमं पदं ॥ स्त्रीणां वा
मभुजे नित्यं धारणात्किं न सिध्यति ॥ वन्ध्यापि लभते पुत्रं शतहायनजीवकं ॥ दीर्घायुरप्रतिहतवलवीर्यसमन्वितं ॥ राशिचक्रं
विलिख्याथ कुन्तं संस्थाप्य पूर्ववत् ॥ विक्षिप्य यंत्रं तन्मध्ये सेवालसर्वंहमाधयेत् ॥ नित्यदर्शाभिवेद्धिषोमहीशान्तिं महीपतिः ॥
वैश्यः समृद्धिमान् भूयो लभेत् शूद्रो यथेप्सितं ॥ एतन्तु कथितं यंत्रं पुरुषार्थैकसाधनं ॥ केवलं तत्प्रयत्नेन गोपयस्व मुने स्वयं ॥
॥ ॥ इति श्रीगौतमीयमहातंत्रे सर्वतंत्रोत्तमोत्तमे द्वाविंशोऽध्यायः ॥ ॥ अथ वक्ष्ये मनुवरं समस्तपुरुषार्थदं ॥ यजज्ञा

नास्तिद्रुयःसर्वोभवन्तिकार्यसंस्थिताः॥लक्ष्मीर्मायाकामबीजंङेऽन्तंकृष्णपदंतथा॥स्वाहेतिमंत्रराजोऽयंभुक्तिमुक्तिफलप्रद
॥नारदोऽस्यमुनिःप्रोक्तश्छन्दोऽनुष्टुबुदाहृतं॥देवताकृष्णइत्युक्तःसमस्तपुरुषार्थदः॥षडङ्गंकामबीजेनषड्दीर्घभेद
नेनतु॥कलायकुसुमश्यामंवृन्दावनगतंहरिं॥गोपगोपीगवावीतंपीतवस्त्रयुगावृतं॥नानालङ्कारसुभगंकौस्तुभोद्भासिव
क्षसं॥मनकाद्यैर्मुनिश्रेष्ठैःसंस्तुतंपरयामुदा॥शंखचक्रलसद्बाहुंहेस्तैद्वयोरितं॥ध्यात्वैवंपरमात्मानंचतुर्लक्षंजपेन्म
नुं॥दशांशंजुहुयान्मंत्रीकुसुमैर्बिल्ववृक्षजैः॥भक्त्यात्रिसंध्यंचयजेद्दशैरिन्द्रादिभिस्ततः॥तथाप्रयोगंकुर्वीतधर्मार्थकाम
ममुक्तये॥पायसैर्घृतैर्हुत्वादिव्यज्ञानमवाप्नुयात्॥तच्चलवणैर्हुत्वालोकनाकर्षयेद्ध्रुवं॥पलाशपुष्पैर्जुहुयात्का
विर्वाग्मीचजायते॥मत्स्यएडीकदलीदुग्धघृतपायसतद्भिया॥तर्पयेद्दयतंमंत्रीगाङ्गेयेनजलेनवै॥मण्डलादीह्नितासि
द्धिर्भवेन्नैवात्रसंशयः॥वाग्भवाद्येनजापेनवागीशसमतांव्रजेत्॥व्रास्मीतन्तुसुमैर्हुत्वानिधिमाप्नोत्ययत्नतः॥श्रीवृक्षफ
लहोमेनराज्यैश्वर्यमवाप्नुयात्॥एवंतेकथितंभक्त्यादुर्लभंमंत्रनायकं॥सर्वसंप्रदायकंप्राप्यंकिंनसिध्यतिमंत्रिणाः॥अ

गौतमी
९०

स्यादशार्णो मारान्तो मंत्रं सूत धनप्रदः॥ नारदोऽस्य मुनिः प्रोक्तो छंदो गायत्री कथितं बुधैः॥ बालकृष्णो देवतास्य समस्तार्थफल
प्रदः॥ षड्दीर्घभाजा वीमेन वीजेनाङ्गक्रिया मता॥ इन्दीवरसमाभासं बालं त्रैलोक्यमोहनं॥ लसद्रत्नमये हीनैर्म्मणितं व
हुभूषणैः॥ नानारत्नमयोन्नासि बुलसत्कामांकुशार्गलं॥ कनालानासमस्यासिस्फूरन्मकरकुण्डलं॥ हस्तिहस्तकराभ्यां च नव
नीतञ्च पायसं॥ दधतं देववृन्दैश्च वेष्टितं गोपबालकं॥ एवं ध्यात्वा जपेन्मंत्री द्वात्रिंशल्लक्षमानतः॥ जपान्ते जुहुयाद्देवो याय
सैर्न्नहवांशतः॥ तर्पणादीनि सर्वाणि पूर्ववत्समुपाचरेत्॥ साधयेत्सर्वकर्म्माणि सिद्धेनानेन मंत्रवित्॥ रक्तपद्मायुतं हु(
त्वा द्विजो ज्ञानमवाप्नुयात्॥ सर्वलोके कशानाच वक्षात्रियो नात्र संशय॥ अन्येषां यद्यदिष्टं स्यात्साधयेन्मनुनामुना॥ रक्त
पद्मोपरि ध्यात्वा शर्करापृथुलाजकैः॥ कदलीगुडवल्याच जलैः सनार्यकेशरम्॥ वस्ताप्नभते वत्र सर्वलोकनमस्कृतं॥
अनेन च यद्यदिष्टं जपमात्रेण साधयेत्॥ मायारमाकामवीजश्रिया द्वादशवर्णकः॥ त्रयोदशाक्षरो मंत्रो दशाहदक्षफलप्र
दः॥ ऋषिरस्य स्वयं ब्रह्मा छंदोऽनुष्टुब्रुदीरितः॥ श्रीकृष्णो देवता प्रोक्तो महदैश्वर्यदायकः॥ कुर्याद्दस्य मनो मंत्री हूं माश्रीरकं

तंत्र
९०
